नं: ११३-घ

काशिकावृत्तिः

सप्तमाध्यायः (अपूर्ण)

पत्राणि ३४

नं०: ११३-घ

पत्राणि ३४

काशिकावृत्ति

सप्तमाध्यायः (अपूर्ण)

नं०: ११३-घ

नं०: ११३-घ
काशिका वृत्ति:
सप्तमाध्याय: (अपूर्ण)
पत्राणि ३४

परिशिष्टरा धीमानुकेआलोपःसिद्धश्च प्रत्ययवपि यो। नाज्ञेवदुक्ता नन्त्या स ष्ठश्रे

पं॰ कृष्णदेवनी पोथी पदमंजरि समाप्त्या पपत्र ३५



।१।

श्रीगणेशायनमः।छ श्रीपाणिनयेनमः। युवोरनाकौ।छ। अंगस्येत्येव युवु वु इत्येतयोरूल्ल्ल विशेषणयोरनुनासिक
यणोः प्रत्यययोर्ग्रहणं। तयोः स्थाने यथासंख्यं अन अक इत्येतावादेशौ भवतः। योरनः। वोरकः। नंद्यादिभ्यो ल्युः।
नंदनः। रमणः। सायमादिभ्य ट्यु ट्युलौ तुट् च। सायंतनः। चिरंतनः। ण्वुल्तृचौ। कारकः। वासुदेवार्जुनाभ्यां वुन्। वासुदे
वकः। अर्जुनकः। अनुनासिकपर्णा सितोकिमर्थं। ऊर्णाया युस्। ऊर्णायुः। भुजिमृङ्भ्यां युक्त्युकौ। भुज्युः। मृत्युः। इ
त्येवमादीनां हि यणोनुनासिकत्वं न प्रतिज्ञायते। प्रतिज्ञानुनासिक्याः पाणिनीयाः। युवारिति निर्देशो द्वंद्वैकवद्भा
व पक्षेनुमनित्यमागमशासनमिति कृत्वा न भवति। नपुंसकलिंगता वा लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति
न भवति। इतरेतरपक्षे तु छांदसो वर्णलोपो द्रष्टव्यः।छ। आयनेयीनीयियः फढखछघां प्रत्ययादीनां। आयन् एय्
ईन् ईय् इय् इत्येते आदेशा भवंति। फ ढ ख छ घ इत्येतेषां प्रत्ययादीनां। फ इत्येतस्य आयन आदेशो भवति। नडादिभ्यः फक्।
नाडायनः। चारायणः। ढ इत्येतस्य एय आदेशो भवति। स्त्रीभ्यो ढक्। सौपर्णेयः। वैनतेयः। ख इत्येतस्य ईन आदेशो भवति। कुला

।१।

त्वः। आढ्यकुलीनः। श्रोत्रियकुलीनः। छ इत्यस्य ईय आदेशो भवति। हृद्वाछः। गार्गीयः। वात्सीयः। घ इत्यस्य इय आदेशो
भवति। क्षत्रा घः। क्षत्रियः। प्रत्ययग्रहणं किं। फक्कति। ढौकते। खनति। छिनत्ति। घूर्णति। आदिग्रहणं किं ॥
।ऊरुदघ्नं। जानुदघ्नं। एते आयन्नादयः प्रत्ययोपदेशकाल एव भवन्ति। एतेषु कृतेषु प्रत्ययाघकृतत्वं भवति।
तथा च घ छौ भवति घ च श्वि कृ ग्रहणमर्थवद्भवति। शंखः। शांडः। इत्येवमादीनां किं उणादयो बहुलमित्यादेशा न भवं
ति। अत एव यङ्किति ईयङुवङ्संज्ञापकं धातुप्रत्ययानामादेशाभावस्य। एडोः खशः। पदरूढौ विशस्पशौ। घात्रित्येव
मादिषु इत्संज्ञाया भावितव्यं। तद्धितेषु हि खकार घकारयोरादेशवचनं सावकाशमनवकाशामित्संज्ञां बाधित्वैनो
त्सहते। आयनीनोर्नकारस्येत्संज्ञायां प्राप्तायां प्रतिविधेयं। नित्कार्यं सिं भवति। छ ॥ झोन्तः ८। छ ॥ प्रत्ययग्रहणमनु
वर्तते। आदिग्रहणं निवृत्तं। प्रत्ययावयवस्य झकारस्य स्थाने अन्त इत्ययमादेशो भवति। कुर्वन्ति। सुन्वन्ति। चिन्वन्ति। अद्य
श्वो वा विज्ञायमानाः पतिभिः सह शयान्ते। उर्विशि भर्यां झसु। अरन्तः। वेरीतः ॥ प्रत्ययस्येत्येव। उज्झिता ॥

उज्झितुं । उज्झितव्यं । अस्मिन्न यंतादेशे कृते प्रत्ययाकदात्त्वं न भवति । तथा च उज्झितकरणमर्थवद्भवति । अदभ्यस्ता
त्वा । ६ । अभ्यस्ताद् गादुत्तरस्य झकारस्य स्थाने अदित्ययमादेशो भवति । ददति । ददतु । दधति । दधतु । जक्ष
२ ति । जक्षतु । जाग्रति । जाग्रतु । अंतादेशापवादोयं जुसादेशेन तु बाध्यते । अददुः । अदधुः । अजक्षुः । अजागरुः ।
अत्राप्यदादेशे कृते प्रत्ययाद्यदात्त्वं भवति । आत्मनेपदेष्वनतः ॥ ७ ॥ आत्मनेपदेषु यो झकारस्तस्य अनका
।रा। रांतादंगादुत्तरस्य अदित्ययमादेशो भवति । चिन्वते । चिन्वतां । अचिन्वत । लुनते । लुनतां । अलुनत । पुनते । पु ।रा।
नतां । अपुनत । आत्मनेपदेष्विति किं । चिन्वंति । अनत इति किं । च्यवंतां । प्लवंते । नित्यत्वादत्र विकरणे कृते झोंतादे
शेन भवितव्यमित्यदादेशो न भवति । अनकारांतेनांगेन झकारविशेषणं किं । इरमाभृन्ते । अद्य श्वो वा विज्ञानि
ष्यमाणाः पतिभिः सह शायीते । शीङो रुट् । शीङोंगादुत्तरस्य झादेशस्यातो रुडागमो भवति । शेरते । शेरतां । अशेर
त । रुडयं परादिः क्रियते । स यदि झकारस्यैव स्यात् अदादेशो न स्यादिति अत एवायमादेशस्यागमो विधी

दि१

यते। वेत्तेर्विभाषा। ७। वेत्तेरंगादुत्तरस्य झादेशस्यातो विभाषा रुडागमो भवति। संविदते। संविद्रते। संविदतां।
संविद्रतां। समविदत। समविद्रत॥ वेत्तेरिति लुग्विकरणग्रहणं किं। विंते। विंदाते। विंदते। इतीदमाभूत्। बहु
लं छंदसि। ८। छंदसि विषये बहुलं रुडागमो भवति। देवा अदुह्र गंधर्वा अप्सरसो गा अदुह्र। दुहे लङि झस्या
देशे कृते रुट्। लोपस्त आत्मनेपदेष्विति लोपः न भवति॥ अदुह्रत। बहुलवचनादत्रापि भवति। अदृश्रन्नस्य केत
वः। ऋदृशोऽङि गुण इत्येतदपि बहुलवचनादेवात्र न भवति। अतो भिस ऐस्। ९। अकारान्तादंगादुत्तरस्य भिस ऐसादे
शो भवति। वृक्षैः। प्लक्षैः। अतिजरसैः। जह्रां अतिक्रांबा ह्लणकुलं इति प्रादिसमासे कृ स्वत्वे वहुते भिस ऐसादेशो भ
वति॥ एकदेशविकृतमनन्यवद्भवतीति जरसशब्दस्यैव जरसादेशः। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति प
रिभाषया भनित्या कष्टाय क्रमणे इति निर्देशात्। अत इति तपरग्रहणं किं॥ खट्वाभिः। मालाभिः। एवं भिसि परत्वात् त्वेदत्वे
स्ति कृते भविष्यति। एत्वे कृते भो तपरत्वादित्वस्तु नित्यस्तथापि सति। अत इत्ययमधिकारोऽङस्याचीति यावत्। बहुलं छंदसि। १०॥

त्येतदेव३

छंद सिविषये भिसो वकुत्वं ऐसादेशो न भवति। अत इत्युक्ते अनतोपि भवति। न द्यौरिति। अतोपि न भवति। देवेभिः।
सर्वेभिः। घाक्रमिति। नेदमदसोरकोः॥७॥ इदम् अदस् इत्येतयोर ककारयोर्भिस ऐसादेशो न भवति॥ एभिः। अमी
३ भिः। अकोरिति किमर्थं॥ इमकैः। अमुकैः। अकोरिति प्रतिषेधवचनं ज्ञापकं। तन्मध्यपतितस्तद्ग्रहणेन गृह्य
त इति। इदमदसोः कादिति नोक्तं। विपरीतोपि नियमः संभाव्येत। इदमदसोरेव कादिति। ततश्चैतन्न स्यात्। सर्वकैः
।उ। ।विश्वकैः। इह तु न स्यादेव। एभिः। अमीभिरिति। टाङसिङसामिनात्स्याः॥ अकारांतादंगादुत्तरेषां टाङसिङस् इत्ये ।ऊ।
तेषां यथासंख्यं इन आत् स्य इत्येत आदेशा भवंति। टा इत्येतस्य इनः। वृक्षेण। ङसेरात्। वृक्षात्। ङस् इत्येतस्य
स्यः। वृक्षस्य। अत इत्येव। सख्या। पत्या। अतिजरसिन। अतिजरसादिति केचिदिच्छंति यथा भाष्ये थाने तदिष्य
त इति दृश्यते। ङेर्यः॥७॥ ङेरिति चतुर्थ्येकवचनस्य ग्रहणं। तस्य अकारांतादंगादुत्तरस्य य इत्ययमादेशो भवति। वृ
क्षाय। प्लक्षाय। अत इत्येव। पत्ये। सख्ये। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येत्यनित्येयं परिभाषेति दीर्घो न त्य वा। सर्व
न्नः१ नाम्नः स्मै॥ अकारांतात्सर्वनाम्नो ङ्गादुत्तरस्य ङे इत्येतस्य स्मै इत्ययमादेशो भवति। सर्वस्मै। विश्वस्मै। सर्वनाम्न इति किं। वृक्षाय। अत

इत्येव। भवते। अथो त्रा स्मै इत्यत्रान्वादेशो शिष्टते एकादेशः प्राप्नोति। तत्रांतरंगत्वात् सर्वस्मै भावः क्रियते पश्चादेकादेश इ
ति॥ छ॥ ङसिङ्योः स्मात्स्मिनौ। ङसिङि इत्येतयोरकारांताद्गादुत्तरस्य योः स्मात्स्मिन्नित्येतावादेशौ भवतः। ङसेः स्मात्।
सर्वस्मात्। विश्वस्मात्। ङेः स्मिन्। सर्वस्मिन्। विश्वस्मिन्। अत इत्येव। भवतः। भवति। सर्वनाम्न इत्येव। देवात्। पु
[illegible]दात्। देवे। प्लुदे। छ॥ पूर्वादिभ्यो नवभ्यो वा। पूर्वादिभ्यो नवभ्यः सर्वनामभ्य उत्तरयोः ङसिङ्योः स्मात्स्मिन्नित्येतावादे
शौ वा भवतः। पूर्वस्मात्। पूर्वात्। पूर्वस्मिन्। पूर्वे। परस्मात्। परात्। परस्मिन्। परे। अवरस्मात्। अवरात्। अवरस्मिन्।
अवरे। दक्षिणस्मात्। दक्षिणात्। दक्षिणस्मिन्। दक्षिणे। उत्तरस्मात्। उत्तरात्। उत्तरस्मिन्। उत्तरे। अपरस्मात्। अ
परात्। अपरस्मिन्। अपरे। अधरस्मात्। अधरात्। अधरस्मिन्। अधरे। स्वस्मात्। स्वात्। स्वस्मिन्। स्वे। अंतरस्मा
त्। अंतरात्। अंतरस्मिन्। अंतरे। नवभ्य इति किं। त्यस्मात्। त्यस्मिन्। छ॥ जसः शी॥ अकारांतात् सर्वनाम्न उत्तरस्य ज
सः शी इत्ययमादेशो भवति। सर्वे। विश्वे। ये। ते। के। दीर्घोच्चारणमुत्तरार्थं। त्रपुनी। जतुनी। इति। छ॥ ओङ आपः। आबंतादं
गादुत्तरस्यौङः शी इत्ययमादेशो भवति। खट्वे तिष्ठतः। खट्वे पश्य। बहुराजे। कारीषगंध्ये। औकारोयं शीविधौङि ऊ

हीताङिश्चास्माकं नास्ति कोयं प्रकारः। सामान्यार्थस्तस्य चासंज्ञानेस्मिन्ङिकार्यं तेष्वप्रसक्तं सदोषः॥ ङित्वेविधा वर्ण
निर्देशमात्रं वर्णे यत्स्यात्तद्विधावतद्वादेः॥ वर्णेश्रूयते नाङित्वप्रसक्तो वा निर्देशोयं पूर्वसूत्रेण वास्यात्॥ नपुंसकाच्च॥ नपुं
सकादङ्गादुत्तरस्यौङः शीइत्ययमादेशो भवति। कुण्डे तिष्ठतः। कुण्डे पश्य। दधिनी। मधुनी। जस्शसोः शिः॥ नपुंसकादङ्गादुत्त
रयोर्जस्शसोः शिरित्ययमादेशो भवति। कुण्डानि तिष्ठन्ति। कुण्डानि पश्य। दधीनि। मधूनि। त्रपूणि। जतूनि। जसा सह
८ चरितस्य शसो ग्रहणादिह न भवति। कुण्डशो ददाति। वनशः प्रविशति। ॥ अष्टाभ्य औश्॥ अष्टाभ्य इति कृताका ८
रोऽष्टन्शब्दो गृह्यते। तस्मादुत्तरयोर्जस्शसोरौशित्ययमादेशो भवति। अष्टौ तिष्ठन्ति। अष्टौ पश्य। कृताकारस्य ग्रहणं
किं। अष्ट तिष्ठन्ति। अष्ट पश्य। एतदेव कृताकारग्रहणं ज्ञापकं अष्टन आ विभक्तावित्यात्वं विकल्पस्य॥ षड्भ्यो लुगित्यस्या
यमपवादः। नाप्राप्ते ह्येतस्मिन्निदमारभ्यते। यस्तु सुपो धातुप्रातिपदिकयोरिति तस्मिन्प्राप्तेऽप्राप्ते च भवतीति न स बाध्य
ते। अष्टपुत्रः। अष्टभार्यः। तदन्तग्रहणमत्रेष्यते॥ परमाष्टौ। प्रियाष्टान इत्यत्राष्टत्वस्याभावादौश्त्वं न भवति। षड्भ्यो लु
क्। षट्संज्ञकेभ्य उत्तरस्य योर्जस्शसोर्लुग्भवति॥ ~~स्वमोर्नपुंसकात्~~ षट् तिष्ठन्ति। षट् पश्य। पञ्च। सप्त। नव। दश। षट्प्र

त्रं ३

धानात्तदंतादपि लुग्भवति। परमषट्। उत्तमषट्। परमपंच। उत्तमपंच। यत्र उपसर्जनं षट् तत्र न लुग्भवति। प्रियषषः॥
प्रियपंचानइति॥ ७॥ स्वमोर्नपुंसकात्॥ सुअम् इत्येतयोर्नपुंसकादंगादुत्तरयोर्लुग्भवति। दधि तिष्ठति। दधि पश्य॥
त्रपु तिष्ठति। त्रपु पश्य। जतु तिष्ठति। जतु पश्य। तदं द्वा स्वनणकुर्वमित्यत्र लुका त्यदाद्यत्वं बाध्यते। एवं विप्रतिषे
धेन। नित्यत्वाद्वा। लुकोदिनिमित्तमतो मिति लक्षणांतरेण व्याहन्यते। न पुनस्त्यदाद्यत्वेनैव। यस्य लक्षणांतरेण निमि
त्तं विहन्यते न तदनित्यं न भवति। अतोम्॥ ८॥ अकारांतादंगादुत्तरयोः स्वमोरमित्ययमादेशो भवति। कुंडं तिष्ठति। कुंडं पश्य। मका
रः कस्मान्न क्रियते। दीर्घत्वं प्राप्नोति। ९। अद्डुतरादिभ्यः पंचभ्यः॥ डतरादिभ्यः पंचभ्यो नपुंसकेभ्य उत्तरयोः स्वमोरद्डादे 36
शो भवति। कतरत्तिष्ठति। कतरत्पश्य। कतमत्तिष्ठति। कतमत्पश्य। अन्यत्तिष्ठति। अन्यत्पश्य। अन्यतमत्तिष्ठति। अन्यतमत्पश्य। पंचभ्य इति
किं। नेमं तिष्ठति। नेमं पश्य। डित्करणं किं। कतरत्तिष्ठतीत्यत्र पूर्वसवर्णदीर्घो मा भूत्। इह तु कतरत्पश्यति। स्वा निझावादमिष्ठत्वेनापि सिद्ध
ति। एवं तर्हि वकारादेशो वक्तव्यः। स न क्रियते। हे कतरदिति संबुद्धिलोपो मा भूत्। अपरे त्वस्य दमादेशार्थं चोड्डतरादिषु अद्डित्याद्युत्तरो
दीनां नलोपो न वदीर्घविधौ। नेतराद्वद्देसि। इतरशब्दादुत्तरयोः स्वमोरद्डादेशो विषये अद्डु इत्ययमादेशो न भवति। इतरमितरम्

पर

निर

५ पु

पद्यते। वार्त्ते घ्रमितरी। त्तोण घ्रमितरी। छंदसीति किं। इतरत्काष्ठं तिष्ठति। इतरत्काष्ठं पश्य। इतरत्कुड्यं पश्य। अतो नित्यस्यानंतर इतराच्छं
दसीति यच्चक्तव्ये नेतराच्छंदसीति वचनं योगविभागार्थं॥ एकतराच्छंदसि ना बाधीयं यड। तिष्ठ यड् इष्य ते। एकतरं तिष्ठति। एकतरं पश्य॥ छं॥
युष्मदस्मद्भ्यां ङसो ऽश्॥ युष्मदस्मदित्येताभ्यां उत्तरस्य ङसो ऽश् इत्ययमादेशो भवति। तव स्वं। मम स्वं। शित्करणं सर्वादेशा
र्थं। अन्यथा ह्यादेशव्यपदेशात्त्रकृत्यर्थमादेरेव स्यात्। ततश्च योवीति यत्वं न स्यात्॥ छं। ङे प्रथमयोरम्॥ छं। ङे इति
अविभक्तिको निर्देशः। ङे इत्येतस्य प्रथमा[...]यो श्च विभक्तयोः प्रथमाद्वितीययोर्युष्मदस्मद्भ्यां उत्तरस्य रयोरमादेशो
भवति। तुभ्यं दीयते। मह्यं दीयते। त्वं। अहं। युवां। आवां। यूयं। वयं। त्वां। मां। युवां। आवां। शसो न॥ छं॥ युष्मदस्मद्भ्यामुत्त
रस्य शसो नकारादेशो भवति॥ अकार उच्चारणार्थः। युष्मान्। ब्राह्मणान्। अस्मान्। ब्राह्मणान्। युष्मान्। ब्राह्म
णीः। अस्मान्। ब्राह्मणीः। युष्मान् ब्राह्मणकुलानि। अस्मान् ब्राह्मणकुलानि। तस्माच्छसो नः पुंसि इत्यनेनैव नत्वे सिद्धे
स्त्रीनपुंसकार्थं वचनं॥ अलिंग वा युष्मदस्मदी। छं। भ्यसो भ्यम्। युष्मदस्मद्भ्यामुत्तरस्य भ्यसो भ्यम् इत्ययमादेशो भवति॥

पु ५

युष्मभ्यं दीयते। अस्मभ्यं दीयते। भ्यमादेशे कृते शेषे लोपे बहुवचने ऽभ्योदित्येत्वं प्राप्नोति। तदंगवृत्ते पुनर्वृत्तावविधि
र्निष्ठितस्येति न भवति। केचित्पुनरभ्यमादेशमेत्वनिवृत्त्यर्थं कुर्वंति। येषां तु शेषे लोपष्टिलोपस्तेषामभ्यमादेश ए
वाउदात्तनिवृत्तिस्वरश्चादेरेव [illegible] भवति। पंचम्या अत्। पंचम्या भ्यसो युष्मदस्मद्भ्यामुत्तरस्यादित्ययमादेशो भवति।
युष्मद् गच्छति। अस्मद् गच्छति। एकवचनस्य [illegible] च। ७। युष्मदस्मद्भ्यामुत्तरस्य पंचम्या एकवचनस्यादित्ययमादेशो भव
ति। त्वद् गच्छति। मद् गच्छति॥ ७ साम आकं। ८॥ सामिति षष्ठीबहुवचनं आगतसुट्कं परिगृह्यते। युष्मदस्मद्भ्यामुत्तरस्य
साम आकमित्ययमादेशो भवति। युष्माकं। अस्माकं। अथ किमर्थमागतसुट्कं परिगृह्यते। नहि आदेशविधानकाल एव सुडि
ष्यते। तस्यैव तु भाविनः सुटो निवृत्त्यर्थं। कृते हि शेषे लोपे युष्मदस्मदोरकारांतवचनात्सुट् प्राप्नोति। स स्थानिं अंतर्भूतत्वा
न्निवर्त्तते। दीर्घोच्चारणं सवर्णदीर्घार्थं॥ अकमि तु सति अकारकरणं एत्वनिवृत्त्यर्थमिति। अतो गुणे पररूपं भवति। ९॥
आत औ णलः। १०। आकारांतादंगादुत्तरस्य णल औ इत्यादेशो भवति। पपौ। तस्थौ। जग्लौ। मम्लौ। अत्र औत्वमेकादेशः १४। स्थानिव
द्भावाद्द्विर्वचने चीत्यनेन क्रमेण कार्याणि क्रियंते। एकादेशादनवकाशत्वाद्दौर्बल्यं। द्विर्वचनादपि परत्वादेकादेश इति। ११॥ तु

योस्त्रातङन्निशिषि अन्यतरस्यां। ल्वाडादेशयोस्तु द्योराशिषि विषये तातङादेशो भवत्यन्यतरस्यां। जीवतात्भवान्। जीवतु भवान्। जीवतात्त्वं। जी
व त्वं। ङित्करणं गुणवृद्धिप्रतिषेधार्थं। तेन सर्वादेशस्तातङ् भवति। ङित्वाच्चास्य स्थानिवद्भावात्पित्वं प्राप्नोति तन्निवर्त्तते। ङिच्च पिन्न भव
तीति। तेन ब्रूतात् भवान्नित्यत्र ब्रुव ईती प्न भवति। आशिषीति किं। ग्रामं गच्छतु भवान्। ग्रामं गच्छतु त्वं। तातङि ङित्वं संक्रमहेत्स्याद् इत्यविधि
श्चेतत्वत्थोन। हेरधिकारेऽद्हेरधिकारो ल्पोपविधौ तु ज्ञापकमादेः।२। तातङो ङित्वसामर्थ्यान्न यमंत्यविधिः स्मृतः। नेतद्दन ङादी
६ नां तेन तत्यविकारदाः।२।८०। विदेः शतुर्वसुः।८। विदङ्गाने। विदेर्धातोः शतुर्वसुरादेशो भवति। विद्वान्। विद्वांसौ। विद्वांसः। अन्यत ६
रस्यामित्येव केचिदनुवर्त्तयंति। विदन्। विदंतौ। विदंतः।८। स्थानिवद्भावादुगित्कार्यसिद्धेर्वसोरुकारकरणं वसोःसंप्रसारणमित्य
त्र वसोरपि सामान्यग्रहणार्थं। एकानुबंधकग्रहणे न द्व्यनुबंधकस्येत्येतदपि न भवति। तथा हि सति उकार[illegible]ग्रहणं अनर्थकं स्या
भवति।७। समासेनञ्पूर्वे क्त्वो ल्यप्।७। अनञ्पूर्वे समासे क्त्वा इत्यस्य ल्यबादेशो भवति। प्रकृत्य। प्र[illegible]हृत्य। पार्श्वतः कृत्य। ना
नाकृत्य। द्विधाकृत्य। समास इति किं। कृत्वा। हृत्वा। अनञ्पूर्व इति किं। अकृत्वा। अहृत्वा। परमकृत्वा। उत्तमकृत्वा। अनञिति नञो
न्यन्नञ्सदृशं अव्ययं परिगृह्यते। तेन नञ् अनव्ययं चानञ्नञ् न भवति। स्नात्वाकालकादिषु मयूरव्यंसकादिषु निपातनाल्ल्यबादेशो
द्विन भवति। अथवा समास इति निर्द्धारणे सप्तमी। तेन क्तांतः समासः समास एव निर्द्धार्यते। स च येन विधिस्तदंतविधिना। न तु

हृ ग्रहणे गतिकारकपूर्वस्येति तथा वा नञ्पूर्वे इत्युच्यते। गतिकारकपूर्वस्यानुग्रहणे नञ्पूर्वस्य प्रसंग एव नास्ति। नञ् न गतिर्न च
कारकमिति। प्रधाय प्रस्थायेत्यादिषु हित्वप्रभृतीनं तरंगानपि विधीन् बाधित्वं गोल्यप् बाधत इत्येतल्लक्षणापितं। क्त्वापि छंदसि ८। समा
सेऽनञ्पूर्वे क्त्वा इत्येतस्य क्त्वा इत्ययमादेशो भवति। अपिशब्दाल्ल्यबपि छंदसि विषये। कृष्णं वासो यजमानं परिधापयित्वा। प्रत्यंच
मर्कं प्रत्यर्पयित्वा। ल्यबपि। उद्धृत्य जानु जुहोति। वा छंदसीति नोक्तं। सर्वोपाधिव्यभिचारार्थं। तेनासमासेपि ल्यब् भवति। अर्च्य
तान्देवान्गतः। छंदोधिकार आ उङ्सरसुगिति यावत्। सुपां सुलुक्पूर्वसवर्णाछेयाडाड्यायाजालः। ९। छंदसि विषये सुपां
स्थाने सु। लुक्। पूर्वसवर्ण। आ। आत्। शे। या। डा। ड्या। याच्। आल इत्येते आदेशा भवंति। सुः ऋजवः संतु पंथाः। पंथान इति प्राप्ते। सु
पां स्थाने सुपो भवतीति वक्तव्यं। धुरि दक्षिणायाः। दक्षिणायामिति प्राप्ते। ति डां तिङो भवतीति वक्तव्यं। चषालं ये अश्वयूपाय तक्षति। तक्ष
तीति प्राप्ते। लुक्। आर्द्रे चर्मन्। लोहिते चर्मन्। चर्मणीति प्राप्ते। हविर्धाने यत्सुन्वंति। तत्सामिधेनीरित्याहुः। यस्मिन् तस्मिन् सामि
धेनीरिति प्राप्ते। पूर्वसवर्णः। धीती। सुती। मती। धीत्या। सुत्या। मत्या इति प्राप्ते। आ। उभा यंतारा। उभौ यंतारौ इति प्राप्ते। आत्। न ताद्ब्रा
ह्मणान्निदामि। न तान्ब्राह्मणानिति प्राप्ते। शे। न युष्मे वाजबंधवः। अस्मे इंद्राबृहस्पती। यूयं वयं इति प्राप्ते। ऐ यादेशो वयादेशाश्च
छांदसत्वादेव न भवतः। या। उरुया। धृष्णुया। उरुणा धृष्णुनेति प्राप्ते। डा। नाभा पृथिव्याः। नाभाविति प्राप्ते। ड्या। अनुष्ठ्या।

व्यावयतात्॥ अनुष्टुभेति प्राप्ते। याच्॥ साधुया। साध्विति सोर्लुकि प्राप्ते। आल्। वसंता यजेत। वसंते यजेतेति प्राप्ते। इयाडियाजीका
राणामुपसंख्यानं॥ इया। उर्विया परिधानं। दार्विया परिधानं। उरुणा दारुणेति प्राप्ते। डियाच्। सुक्षेत्रिया। सुगात्रिया। सुक्षेत्रि
णा सुगात्रिणेति प्राप्ते। ईकारः। दृतिं न शुष्कं सरसी शयानं। सरसि शयानमिति प्राप्ते। आङ्याङ्यारामुपसंख्यानं। आङ्। प्रबा
हवा। प्रबाहुनेति प्राप्ते॥ अयाच्। स्वप्नया वसेवनं। स्वप्नेनेति प्राप्ते। अयार्॥ सिंधुमिव नावया। नावेति प्राप्ते। अयारो रेफस्य उ
7 पोत्तमं रितीति उपोत्तमस्योदात्तार्थं। अमो मशः॥ अमिति मिबादेशो गृह्यते। तस्य छंदसि विषये मशादेशो भवति। वधीं वृत्रं
७ क्रमीहेत्स्य शाखां। लुङि बहुलं छंदस्य माङ्योगेपीति अडागमाभावः। शित्करणं सर्वादेशार्थं। मकारस्यापि मकारवचन
मनुस्वारनिहत्यर्थं स्यात्॥ लोपस्त आत्मनेपदेषु। आत्मनेपदेषु तकारस्य छंदसि विषये लोपो भवति। दिवा अदु
ह्र। अदुहतेति प्राप्ते। दुह्रामश्विभ्यां पयः। दुह्रामिति प्राप्ते। दक्षिणतः शये। शेत इति प्राप्ते। अपीत्यधिकारान्न भव
ति। नत आत्मानमन्त्रं तं कुरुते। आत्मनेपदेष्विति किं। वत्सं दुहंति कलशं चतुर्बिलं। धूमो ध्यात॥ ६॥ छंदसि विषये ध
मो ध्यादित्ययमादेशो भवति। अंतरवो क्ष्माणं वारयध्वात्। वारयध्वमिति प्राप्ते॥ यजध्वैनमिति च। ७॥ यजध्वमित्येतस्य
एनमित्येतस्मिन्परतो मकारस्य लोपो निपात्यते। वकारस्य च यकारो भवति। यज्ञं ध्यैनं प्रियमेधा। यजध्वमेनमिति प्राप्ते॥ तस्य

तात्। ७। तत्रादस्य लोपो मध्यमपुरुषबहुवचनस्य स्थाने तादित्ययमादेशो भवति। गात्रं गात्रमस्या नूनं कृणुतात्। कृणुतेति प्राप्ते।
।अव ध्यमे दर्पार्थिवं खनतात्। खनतेति प्राप्ते। अस्मा रक्षः संसृजतात्। संसृजतेति प्राप्ते। सूर्यं चक्षुर्गमयतात्। गमयतेति प्राप्ते।
।तप्तनप्तनथनाश्च। ८। तस्येति [illegible] वर्त्तते। छंदसि विषये तशब्दस्य स्थाने तप् तनप् तन थन इत्येते आदेशा भवंति। तप् श्रृणोत
ग्रावाणः। श्रृणुतेति प्राप्ते। तनप् दधातन। धत्तेति प्राप्ते। तन। जुजुष्टन। जुषतेति प्राप्ते। छांदसत्वात्परस्मैपदं। थन। यदिष्ठन।
यदिष्ठतेति प्राप्ते। पित्करणमङित्वार्थं ॥ इदंतो मसि। ९। छंदसि विषये मसित्ययं शब्द इदंतो भवति। मसः सकारांतस्य इकारागमो
भवति। स च तस्यांतो भवति। तद्ग्रहणेन गृह्यत इत्यर्थः॥ पुनस्त्वोदीपयामसि। दीपयाम इति प्राप्ते। शलभां भंजयामसि॥ भंजयाम इति
प्राप्ते। यथि रात्रिं वासयामसि। वासयाम इति प्राप्ते॥ क्त्वायक्। १०। क्त्वाइत्येतस्य छंदसि विषये यगागमो भवति। दत्वाय सविता धियः। द
त्वेति प्राप्ते। क्त्वापि छंदसीत्यस्यानंतरमिदं कस्मान्नोच्यते॥ समास इति तत्रानुवर्त्तते। इष्ट्वीनमिति च। ११। इष्ट्वीनमित्ययं शब्दो
निपात्यते छंदसि विषये। यजेः क्त्वाप्रत्ययांतस्य ईनमादेशोऽन्त्यस्य निपात्यते। इष्ट्वीनं देवान्। इष्ट्वा देवानिति प्राप्ते। पीत्वीनमित्यपि
ष्यते। पीत्वेति प्राप्ते। चकारस्यानुकर्षसमुच्चयार्थत्वात्सिद्धं। स्नात्व्यादयश्च। १२। स्नात्वी इत्येवमादयः शब्दा निपात्यंते छंदसि विषये॥
स्नात्वीमलादिव। स्नात्वेति प्राप्ते। पीत्वी सोमस्य वावृधे। पीत्वेति प्राप्ते। आकारादयो यमादिशब्दः। आज्जसेरसुक्। १३। अवर्णांतादंगा
दुत्तरस्य जसेरसुगित्ययमागमो भवति छंदसि विषये। [illegible] जनाः सोम्याः इति प्राप्ते। ये पूर्वासो य उपरास ईयुः

इत्यत्र परत्वात् अस्तु किं स्यात् तेपुनः प्रसंगविज्ञानात् शीभावः प्राप्तः । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति न भवति ॥ अश्वक्षीर-
वृषलवणानामात्मप्रीतौ क्यचि ॥ छंदसीत्यतः प्रभृति निवृत्तं । अश्वक्षीरवृषलवण इत्येतेषामंगानां आत्मप्रीतौ क्यचि परतोऽसु-
गागमो भवति । अश्वस्यति वडवा । क्षीरस्यति माणवकः । वृषस्यति गौः । लवणस्यत्युष्ट्रः । आत्मप्रीताविति किं । अश्वीयति । क्षीरीयति । वृ-
षीयति । लवणीयति । अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यं । क्षीरलवणयोर्लालसायामिति च । तत्रापि रेकोऽलालसा । अन्यत्र
८ आत्मप्रीतावपि न भवति । अपर आह ॥ सर्वप्रातिपदिकेभ्यो लालसायामसुग्वक्तव्यः । दध्यस्यति । मध्वस्यति । इत्येवमाद्यर्थं ॥
अपर आह । सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः । दधिस्यति । मधुस्यति । इत्येवमाद्यर्थं ॥ आमि सर्वनाम्नः सुट् । ५२ ॥ ८
आदितिवर्त्तते । अवर्णान्तादुत्तरस्यामः सुडागमो भवति । सर्वेषां । येषां । तेषां । सर्वासां । यासां । तासां । आदित्येव । भवतां । आ-
मिति षष्ठीबहुवचनं गृह्यते । नेह त्राम्नन्था मीभ्य इति । तस्य परत्वाद्दाट् याट् स्याट् टो भवति । किमेतेन व्यवधानात्सुः । आमश्च-
योर्लिटि नातः सर्वनाम्नः स्थाने परोस्तः । सानुबंधकाविवीनु गृह्येते । आमिति सप्तमीनिर्देशोऽत्रार्थं । इह तु सर्वनाम्नो
म्न इति पंचमीनिर्देशात् आदितः चेत्स्येति षष्ठीं प्रकल्पिनी भवति । त्रेस्त्रयः । ५३ । त्रि इति अस्य आमि परे त्रय इत्यय-
मादेशो भवति । त्रयाणां । त्रीणां इति प्राप्ते । त्रीणामिव सहद्राणामिति । ह्रस्वनद्यापो नुट् । ५४ । ह्रस्वांतान्नद्यंता दाबं-

ताश्च उत्तरस्यामोनुडागमो भवति। ह्रस्वांतानावत्। वृक्षाणां। प्लक्षाणां। अग्नीनां। वायूनां। कर्तॄणां। हर्तॄणां। नद्यंतात्। कुमारीणां।
किशोरीणां। गौरीणां। शार्ङ्गरवीणां। लक्ष्मीणां। ब्रह्मबन्धूनां। आबंतात्। खट्वानां। मालानां। बहुराजानां। कारीषगंध्यानां। षट्च
तुर्भ्यश्च। षट्संज्ञकेभ्यश्चतुरशब्दाच्चोत्तरस्यामोनुडागमो भवति। षण्णां। पंचानां। सप्तानां। नवानां। दशानां। चतुर्णां। रेफांता
याः संख्यायाः षट्संज्ञा कस्मान्न विहिता। षड्भ्यो लुगित्यत्र। बहुवचननिर्देशादत्र संख्याप्रधानस्य ग्रहणं भवति। परमषण्णां।
परमनवानां। परमसप्तानां। परमचतुर्णां। उपसर्जनीभूतायास्तु संख्याया न भवति। प्रियषषां। प्रियपंचां। प्रियचतुरां इति। श्री
ग्रामण्याश्छंदसि॥छ॥ श्रीग्रामणी इत्येतयोः छंदसिविषये आमोनुडागमो भवति। श्रीणामुदारो धरुणो रयीणां। अप्यत्र सूतग्राम
णीनां। श्रीशब्दस्य वामीति विकल्पेन नदीसंज्ञा तत्र नित्यार्थं वचनं। (स्तुतग्रामणीनामिति) यदा सूताश्च ग्रामण्यश्च सूतग्राम
ण्यो भवंति तदर्थं इदं वचनं। यदा तु सूतश्च ग्रामणीश्च सूतग्रामणि। ~~स्तुतग्रामणि वेति सूतग्रामणीनामिति~~ नेदा कृत्स्नं लादेवसिद्धं ×मितिना रं भणीयं ३×
८७ गोः पादांते॥छ॥ गोशब्देनेह समकृपादांते गृह्यते। गो इत्येतस्मादृक्पादांते वर्त्तमानादुत्तरस्यामोनुडागमो भवति। विद्माहि त्वा गोपतिं शू
र गोनां। पादांत इति किं। गवां गोत्रमुदसृजो यदंगिरः। सर्वे विधयः छंदसि विकल्प्यंते। इति पादांतेऽपि विकल्पो भवति। हंतो
ते४

रं शत्रूणां ष्टधिविराड्जं गोपतिं गवां। इदितो नुम् धातोः। ६९। इदितो धातोर्नुमागमो भवति। कुडि। कुंडिता। कुंडितुं॥ कुंडितव्यं। कुडि कुंडि
ता। कुंडितुं। कुंडितव्यं। कुंडा। कुंडा। इदितिकिं। पचति। पठति। अयं धातूपदेशावस्थायामेव नुमागमो भवति। कुंडा कुंडे त्यत्र गु
रोश्च हलइ त्यकार प्रत्ययो यथा स्यात्। तथा लिधिन्विष्टण्यार वनिप्रत्ययविधावेव नुमनुषक्तयोर्ग्रहणं ज्ञापकं। धातुग्रहणं वेदोक्ते
८ यते। धात्वपदेशकाल एवनुमागमो यथा स्यात्। इत्येवमर्थं॥ तासिसि वोरिदत्को यं नास्तीति। उच्चारणार्थो निरनुनासिक रकारः पठ्यते॥
अमस्तत्येवमादौ हि हनः सिङितिकित्वविधानसामर्थ्यान्नकारलोपो न भवति। इदकस्मान्न भवति। नेत्राछेत्रेति। इरितामिरनुप
संख्यानमितिसमुदायस्येत्संज्ञा इदित्वं नास्ति। अवयवस्योपी संज्ञायां सत्यां गोः पादांत इत्यतो [illegible] ग्रहणमनुवर्तयितव्यं। तेनांते इदि ८
तो ग्रहणं ते। शे मुचादीनां॥ ७०। शेप्रत्यये परतो मुचादीनां अंगानां नुमागमो भवति। मुचु। मुंचति। लुप्। लुंपति। विद्। विंदति। लि
पि। लिंपति। षिचू। सिंचति। कृती। कृंतति। खिद्। खिंदति। पिश्। पिंशति। शा इति किं। मोक्ता। मोक्तुं। मोक्तव्यं। मुचादीनामिति किं।
तुदति। शेतृंफादीनामुपसंख्यानं कर्तव्यं। के पुनस्तृं [illegible] फादयः। तृफ तृंफ तृंफ तृन्तौ। दृप दृंप दृंफ दृंफ दृंफ गुंफ उंफ क्रेशो। गुफ गुं
फ ग्रंथे। उभ उंभ पूरणे। शुभ शुंभ शोभार्थौ। इति अत्रये सानुषंगास्ते तृंपादयः। तत्र ये मनिदितां हलउपधायाः क्ङिति

नेताइत्यनायसित्तवर्ता [illegible] दिति टिलोपस्यासिद्धत्वान्नासेः। ६

अनुनासिकलोपेद्यते नुम्विधीयते। स च विधानसामर्थ्यान्न लुप्यते। तृंफति। तुंपति। तुंफति। दृंफति। गुंफति। उंभति। शुंभति। येनुनि
रनुषंगास्त्वेवां। तृफति। तुपति। तुफति। दृफति। उभति। शुभतीत्येव भवति। छ। मस्जिनशोर्झलि। छ। मस्जिनशोः इत्येतयोर्झलादौ
लादौ प्रत्यये परे नुमागमो भवति। मंक्ता। मंक्तुं। मंक्तव्यं। नंष्टा। नंष्टुं। नंष्टव्यं। झलादावितिकिं। मज्जनं। नशिता। मस्जेरंत्यात्पूर्वं नुमि
नमिच्छंति [redacted] अनुषंगसंयोगादिलोपार्थं॥ मग्नः। मग्नवान्। छ। रधिजभोरचि। रधिजभीत्येतयोरजादौ प्रत्यये परतो नुमागमो भ
वति। रंधयति। रंधकः। साधुरंधी। रंधं रंधं धावते। जंभयति। जंभकः। साधुजंभी। जंभं जंभं सोवर्तते। परत्वाद्‌पि सति
वृद्धिर्नित्यत्वान्नुमा बाध्यते। अचीतिकिं। रद्धा। जब्धुं। छ। नेट्यलिटि रधेः। छ। इडादावलिटि प्रत्यये परे रधेर्नुमागमो न भवति॥
रधिता। रधितुं। रधितव्यं। इटीतिकिं। रंधनं। रंधकः। अलिटीतिकिं। ररंधिव। ररंधिम। तुमिहकृते संयोगांतत्वात्किलं नास्ति [redacted]
[redacted] तिनकारलोन भवति। क्वसौ कथं भवितव्यं। रधिवानिति। [redacted] कर्तव्यं। एत्वाभ्यासलोपयोः कृतयोरिडागमः क्रियते। त
नुमागमे [redacted] स्योपदेशिकत्वाश्रयोल्लोपः। अथ कथं इटिलिटीत्येवं नियमः कस्मान्नक्रियते। लिट्येव इटि नान्यत्रेति। विपरीतम
वधारणं संभाव्येत। इड्येवालिटि नान्यत्रेति। धातोरर्धेतावत्तु नस्यात्। रधितेत्यत्रनस्यादेव। छ। रभेरशब्लिटोः। रभे

[redacted] अथ ७२ त

रंगस्य शप्लिटोर्विड्डिति अडादौ प्रत्यये परतो नुमागमो भवति। अरंभयति। आरंभकः। साध्वारंभी। आरंभं आरं
भं। आरंभो वर्त्तते॥ अशप्लिटोरिति किं। आरभते। आरेभे। अचीत्येव। आरब्धं॥ लभेश्च॥ छ॥ लभेश्चाडादौ प्रत्यये परे चा
शप्लिटोर्विड्डिते नुमागमो भवति। लंभयति। लंभकः। साधुलंभी। लंभं लंभं लंभो वर्त्तते। अशप्लिटोरित्येव। लभते। लेभे॥
अचीत्येव। लब्धा। पृथग्योगकरणमुत्तरार्थं। छ। आङो यि। आङ उत्तरस्य लभेर्यकारादि प्रत्ययविषये नुमागमो भवति। आलंभ्या
गौः। आलंभ्यो वडवा। आकृत्प्रत्ययोत्पत्तेर्नुमि कृते विहितमदुपधत्वमिति कृत्वा लोर्भ्यदिति ण्यत्प्रत्ययस्तत्र कृते उत्तरपदप्रकृतिस्व
रत्वेनांतस्वरितत्वं भवति। यति पुनरुत्तरपदस्य घोदात्तत्वं स्यात्। आङ इति किं। लभ्यः कथमग्निष्टोमे आलंभ्य इति सर्वे विधयः
१० छंदसि विकल्प्यंते। आलभ्य इत्यत्र नुमि कृते अनुषंगलोपः क्रियते। उपात्प्रशंसायां॥ छ॥ उपादुत्तरस्य लभेः प्रशंसा १०
यां गम्यमानायां यकारादि प्रत्ययविषये नुमागमो भवति। उपलंभ्यानि धनानि भवता। उपलंभ्या विद्या। कर्त्तोपप्रशस्यतेऽक
मेवा। ण्यत्प्रत्ययांतत्वादंतस्वरितत्वमेव। प्रशंसायामिति किं॥ उपलभ्यमस्मात् वृषलात्किंचित्। अडुपधत्वात् प्रत्ययांतमिदं॥
उपसर्गात्खल्घञोः॥ छ॥ उपसर्गादुत्तरस्य लभेः खल्घञोः परतो नुमागमो भवति। दुष्प्रलंभः। सुप्रलंभः। घञि। प्रलंभः॥

ते ४ ×खलि १

विवलंसः। सिद्धे सत्यारंभो नियमार्थः। उपसर्गाद्वलसेः खल्घञोर्नुमागमो भवति। नान्यत्र। इषल्लभः। लाभो वर्त्त
ते। न सुदुर्भ्यां केवलाभ्यां। ८७। सुदुर इत्येताभ्यां केवलाभ्यामन्योपसर्गरहिताभ्यामुपसृष्टस्य लभेः खल्घञोः परतो नुमागमो न भव
ति॥ सुलभो दुर्लभः। घञि। सुलाभः। दुर्लाभः। केवलाभ्यामिति किं। सुप्रलंभो दुःप्रलंभः। सुदुर्भ्यामिति तृतीयां मत्वा केवलग्रहणं क्रियते नोपसृष्टादि
व्यवहितत्वाद्वा प्रसंगः। अतिसुलभमित्यत्र कर्मप्रवचनीयत्वादतः केवलत्वमस्त्यत्र ह्यनुपसर्ग इति प्रतिषेधो भवति॥ यद्वान्वानियाद्यो न
कर्मप्रवचनीयसंज्ञकस्तदा नुम्भवत्येव। अतिसुलंभमिति। सुदुर्भ्यामिति पंचमीनिर्देशात्पूर्वोपसर्गस्य केवलग्रहणं कर्तव्यमेव॥ ८८॥ ॥विभा
षा चिण्णमुलोः। ८९॥ ॥चिण्णमुलोरित्येतयोः प्रत्यययोः परतो लभेर्विभाषा नुमागमो भवति। अलाभि अलंभि। लाभं लाभं। लंभं लंभं॥ इयं
व्यवस्थितविभाषा तेनानुपसृष्टस्य विकल्पः। उपसृष्टस्य तु नित्यं नुम्भवति। प्रालंभि। प्रलंभं प्रलंभं। ९०॥ ॥उगिदचां सर्वनामस्थाने
धातोः। ९१॥ ॥उगितामंगानां धातुवर्जितानां अंचतेश्च सर्वनामस्थाने परतो नुमागमो भवति॥ भवत्। भवान्। भवंतौ। भवंतः। भवतश्च भवति
भवंतौ॥ ईयसुन्। श्रेयान्। श्रेयांसौ। श्रेयांसः। श्रेयांसं। श्रेयांसौ। शतृ। पचन्। पचंतौ। पचंतः। अंचतेः। प्राङ्। प्रांचौ। प्रांचः। उगि

दृषामितिकिं। दृषत्। दृषदौ। दृषदः। सर्वनामस्थान इतिकिं। भवतः प्रश्य। अंचतिग्रहणं नियमार्थं।। अंचुगतीत्यतो न्यस्यमा
भूत्। न खास्वत्। पर्णध्वत्। अधातोरितिकिं। अधातु भूतपूर्वस्यापि यथास्यात्। गोमंतमिच्छति। गोमत्यतेरप्रत्ययः। गोमा
न्। अत्र हि धातुत्वाद्भवति ग्रहणान्न स्यात्।। युजेरसमासे।।७।। युजेरसमासे सर्वनामस्थाने परतो नुमागमो भवति। युङ्। युञ्जौ।
युञ्जः। असमास इतिकिं। अश्वयुक्। अश्वयुजौ। अश्वयुजः। युजेरिति इकारनिर्देशात् युज समाधावित्यस्य ग्रहणं न भवति। युजं समाप
न्नाऋषयः। नपुंसकस्य झलचः।।७।। नपुंसकस्य झलंतस्याजंतस्य च सर्वनामस्थाने परतो नुमागमो भवति।। उदश्विंति। शकृंति। पयां ११
११ सि। यशांसि। अजंतस्य। कुंडानि। वनानि।। त्रपूणि। जतूनि। नपुंसकस्येतिकिं। अग्निचित्। ब्राह्मणः। झलच इतिकिं। बहुपुरि। बहुधुरि। वि
मलद्दिवि। चत्वारि। अहानि। उगितो नपुंसकस्य झलंतस्य परत्वादनेनैव नुम् भवति।। श्रेयांसि। भूयांसि। कुर्वंति। कुर्वंति। ब्राह्म
णकुलानि। बहूर्ज्जि इति प्रतिषेधो वक्तव्यः। बहूर्ज्जि ब्राह्मणकुलानि। अंत्यात्पूर्वं केचिदिममिच्छंति। बहूर्ज्जि ब्राह्मणकुलानि।।७
इकोचि विभक्तौ।।७।। इगंतस्य नपुंसकस्यांगस्य अजादौ विभक्तौ परतो नुमागमो भवति। तुंबुरुणी। त्रपुणी। जतुनी। तुंबुरुणे। त्रपुणे। जतु
ने। इक इतिकिं। कुंडे। पीठे। अचीतिकिमर्थं। उत्तरार्थं।। यद्येवं भस्यैव कर्त्तव्यं। इह तु करणे एतत्प्रयोजनं। क्वेत्र यो [illegible] इत्यत्र नु

ना ४

मुमाभूत्। नङिसंबुद्ध्योरिति नलोपप्रतिषेधः स्यात्। ननु वर्त्मनि लुमतांगस्येति [illegible] प्रत्ययलक्षणप्रतिषेधादिभक्तिरेव नास्ति। एवं तर्हि
इदं तद्देवदत्तौ पक्वे अन्नग्रहणं ज्ञापकं। [illegible] न लुमतांगस्येत्यत्र प्रत्ययलक्षणप्रतिषेधोत्र नास्तीति। तथा च संबुद्धि
गुणः क्रियते। विभक्ताविति किं। नौंबुरवंहूर्म। इकोचि व्यञ्जने मा भूदस्तोल्लोपः स्वरः कथं। स्वरो वै [illegible] अयमाणोपि लुप्तो किं न भ
विष्यति। रायाल्लंतिस्य भावश्च यवधान् लुमा अपि। नुड्याय उत्तरार्थं तु इह किं चित्तत्र पाइति॥ छ तृतीयादिषु भाषितपुंस्कं पुंवद्गालव
स्य। छ तृतीयादिषु अजादिविभक्तिषु परतद्गतं नपुंसकलिंगं भाषितपुंस्कं पुंवद्भवति। गालवस्याचार्यस्य मतेन। यथा पुंसि ह्रस्व नुमौ
न भवतः तद्वदत्रापि न भवत इत्यर्थः। ग्रामणीः ब्राह्मणः। ग्रामणि ब्राह्मणकुलं। ग्रामण्या ब्राह्मणकुलेन। ग्रामणिना ब्राह्मणकुले
न। ग्रामण्ये ब्राह्मणकुलाय। ग्रामणिने। ब्राह्मणकुलाय। ग्रामण्यो ब्राह्मणकुलात्। ग्रामणिनो ब्राह्मणकुलात्। शुचिर्ब्राह्मणः। शु
चि ब्राह्मणकुलं। शुचये ब्राह्मणकुलाय। शुचिने ब्राह्मणकुलाय। शुचेर्ब्राह्मणकुलात्। शुचिनो ब्राह्मकुलात्। तृतीयादिष्वि
ति किं। ग्रामणिनी ब्राह्मणकुले॥ शुचिनी ब्राह्मकुले। भाषितपुंस्कमिति किं। त्रपुणे। जतुने। इकः कस्मान्न भवति॥

म५ त३

[redacted] पीलुर्वृक्षः। पीलुफलं। पीलुने फलायेति॥ समानायामाकृतौ यद्भाषितपुंस्कं तुल्ये प्रवृत्तिनिमित्ते यद्भाषितपुंस्कं
तस्य पुंवद्भावः। इगन्तलक्षणा वृत्तिः प्रवृत्तिनिमित्तं पुंसि शब्दे फला वृत्तिर्नपुंसके तदेतदेवं कथं भवति। भाषितपुंस्कमिति भा
षितः पुमान्नित्यस्मिन्नर्थे तुल्ये प्रवृत्तिनिमित्ते भाषितपुंस्कशब्दे नोच्यते। तद्योगादभिधेयमपि यन्नपुंसकं तदपि भाषितपुंस्कं॥
तस्य प्रतिपादकं यच्छब्दरूपं तदपि भाषितपुंस्कमिति। इक इत्येव। कीलालपा ब्राह्मणः। कीलालपं ब्राह्मणकुलं। कीला
१२ लपेन ब्राह्मणकुलेन। अचीत्येव। ग्रामणिभ्यां। कुलाभ्यां। ७ अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः। ७॥ अस्थिदधिसक्थ्य
क्षि इत्येतेषां नपुंसकानां तृतीयादिष्वजादिषु परतोऽनङित्ययमादेशो भवति। स चोदात्तो भवति। अस्थ्ना। अस्थ्ने। दध्ना। १२
दध्ने। सक्थ्ना। सक्थ्ने। अक्ष्णा। अक्ष्णे। अस्थ्यादयः शब्दा आद्युदात्ताः। तेषामन्त्यादेशः। स्थानिवद्भावादनुदात्तः स्यादिति उदात्त
वचनं। तत्र स[illegible] संज्ञायामल्लोपे कृते उदात्तनिवृत्तिस्वरेण विभक्तिरुदात्तो भवति। एतैरस्थ्यादिभिर्नपुंसकैरनपुंसक
स्यांगस्य तदन्तग्रहणमिष्यते। प्रियसक्थ्ना ब्राह्मणेन। तृतीयादिष्वित्येव। अस्थिनी। अचीत्येव। अस्थिभ्यां। अस्थिभिः॥
छंदस्यपि दृश्यते। [redacted]॥ अस्थिदधिसक्थि आदि इत्येतेषां अनङ् छंदसि अपि दृश्यते। यत्र

विहितस्ततोन्यत्रापि दृश्यते। अत्रीत्येकं। अनजादावपि दृश्यते। इंद्रो दधीचो अस्थानि:। भद्रं पश्येमाक्षभि:। तृतीयादिषु वि
धिकं। अनृतीयादिष्वपि दृश्यते। अस्थान्युपकृत्यपचति। विभक्तावित्येकं। अविभक्तावपि दृश्यते। अक्ष्णावतालुंगत्वेन। अ
स्थन्वंतंयदनस्थाबिभर्ति॥ ॥ ईत् द्विवचने॥ ॥ द्विवचने परतः छंदसि विषये अस्थ्यादीनामीकारादेशो भवति। सचोदात्तो भ
वति। अक्षीते इंद्रपिंगले कपेरिव। सक्थी। अक्षीभ्यां ते नासिकाभ्यां। अक्षीत्यत्र परत्वादीकारेण नुम् [illegible] बाध्यते। तत्र केचित्सक्थ्य
न्ता विप्रतिषेधेय बाधितं तद्बाधितमेवेति पुनर्नुम् न भवति॥ ॥ नाभ्यस्ताच्छतुः॥ ॥ अभ्यस्तादंगादुत्तरस्य शतुर्नुम् न भ
वति। ददत्। ददतौ। ददतः। दधत्। दधतौ। दधतः। जक्षत्। जक्षतौ। जक्षतः। जाग्रत्। जाग्रतौ। जाग्रतः। शतुरनंतरईकारोन
विहितइति व्यवहितस्यापि नुमः प्रतिषेधो विज्ञायते। वा नपुंसकस्य॥ ॥ अभ्यस्तादंगादुत्तरो यः शतृप्रत्ययस्तदंतस्य नपुंसक
स्य वा नुमागमो भवति। ददंति कुलानि। ददति कुलानि। जक्षंति कुलानि। जक्षति कुलानि॥ ॥ आच्छीनद्योर्नुम्॥ ॥ अवर्णांतादंगादुत्त
रस्य शतुर्नुमागमो भवति वा शीनद्योः परतः। तुदती कुले। तुदंती कुले। तुदती ब्राह्मणी। तुदंती ब्राह्मणी। याती कुले। यांती कुले। याती ब्रा
ह्मणी। यांती ब्राह्मणी। करिष्यती कुले। करिष्यंती कुले। करिष्यती ब्राह्मणी। करिष्यंती ब्राह्मणी। अत्रांतरंगत्वादेकादेशे कृ

तेव्यपवर्गाभावात् अवर्णांतादंडुत्तरस्य शातुरिति न युज्यते वक्तुं । उभयताश्रयेनांतादिवद्‌दिति अंतादिवद्भावोपि नास्ति । भूत इत्वंग
त्याश्रयणेन अदती धृती त्येवमादिष्वपि अतिप्रसंग इति । अत्र समाधिं केचिदाहुः । शत्रेवयवे शतृशब्दो वर्तते अवर्णांतादंगादुत्त आ१
रोयः शत्रवयव इति । अपरे पुनराहुः । आदित्यनेन शीनद्योर्विशेष्यते । अवर्णांतादंगादुत्तरे ये शीनद्यौ तयोः शीनद्योः शत्रंत
१३ स्यानुम् भवति । तत्र येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादित्तकारेण व्यवधाने नमाश्रितं भवति । छ । शप्श्यनोर्नित्यं । छ । शप्
श्यनेरित्येतयोः शतुः शीनद्योः परतो नित्यं नुमागमो भवति । पचंती कुले । पचंती ब्राह्मणी । यजंती कुले । यजंती ब्राह्मणी । दीव्यंती कुले । दीव्यं १३
ती ब्राह्मणी । सीव्यंती कुले । सीव्यंती ब्राह्मणी । नित्यग्रहणं वैतस्य निवृत्त्यर्थं । इत्यारंभसामर्थ्यान्नित्यं स्यात् । उत्तरत्र विकल्प एवानुवर्त्तेत
इत्याशंका । छ । सावनडुहः । छ । सौ परतोऽनडुह इत्येतस्यांगस्य नुमागमो भवति । अनड्वान् । हे अनड्वन् । अत्र केचिदाहुः त्यादिविकारा
णाममाः त्वतयोर्नुमं कुर्वंति । तेन नुमा आममौ न बाध्येते । आम स्थानं नुमिति । अपरे [illegible] सत्यपि सामान्यविशेषविषयत्वे आममो
र्नुमश्च समावेशमिच्छंति । न बाध्यबाधकभावं । यथा दिकीर्षतीत्यादिषु दीर्घत्वद्विर्वचनयोरिति । छ । दृक्स्ववस्स्वतवसां छंदसि । छ । दृक्
स्ववस्स्वतवस्स्व इत्येतेषां सौ परतो नुमागमो भवति छंदसि विषये । ईदृक्ङ् । यादृक्ङ् । स्ववान् । स्वतवान् । दिव औत् । छ । दिव इत्येतस्य सौ

य
परतो औदित्यमादेशो भवति। द्योः। दिविति प्रातिपदिकमस्ति निरनुबंधकं धातुश्च सानुबंधकः। स इह न परिगृह्यते तेनाद्य द्युरिति॥
ठापथिमथ्यृभुक्षामात्।छ॥ पथिन् मथिन् ऋभुक्षिन् इत्येतेषां सोपरत आकारादेशो भवति। पंथाः। मंथाः। ऋभुक्षाः। स्थानिन्यनुना
सिके प्यनुनासिक आकारो न भवति। भव्यमानेन सवर्णानां ग्रहणं नेति श्रुतत्वाद्यनुज्ञायते।छ॥ इतोत्सर्वनामस्थाने।छ॥ पथ्यादी
नां इकारस्याकारादेशो भवति। सर्वनामस्थापरतः। पंथाः। पंथानौ। पंथानः। पंथानं। पंथानौ। मंथाः। मंथानौ। मंथानः। मंथानं। मं
थानौ। ऋभुक्षाः। ऋभुक्षाणौ। ऋभुक्षाणः। ऋभुक्षाणं। ऋभुक्षाणौ। आदिति वर्तमाने पुनरद्ग्रहणं परर्वार्थं ऋभुक्षणमित्यत्र वाष
पूर्वस्य निगम इति दीर्घविकल्पो यथास्यात्।छ। थो न्थः।छ॥ पथिमथ्योस्थकारस्य थ इत्ययमादेशो भवति सर्वनामस्था
ने परतः। पंथाः। पंथानौ। पंथानः। पंथानं। पंथानौ। मंथाः। मंथानौ। मंथानः। मंथानं। मंथानौ॥ भस्य टेर्लोपः।छ॥ पथ्यादीनां भस्य सं
ज्ञकानां टेर्लोपो भवति। पथः पश्य। पथा। पथे। मथः पश्य। मथा। मथे। ऋभुक्षः पश्य। ऋभुक्षा। ऋभुक्षे। सर्वनामस्थान इत्येतद
नुवर्तमानमपि विरोधादिह न संबध्यते।छ। पुंसोऽसुङ्।छ। पुंसित्येतस्य सर्वनामस्थाने परतोऽसुङादेशो भवति। पुमान्। पुमांसौ।
पुमांसः। पुमांसं। पुमांसौ। सर्वनामस्थान इत्येव। पुंसः पश्य। इह तु परमपुमानित्यत्र कुविभक्तिः तत्र समासांतोदात्तत्वं। उसन्नायां

विभक्तौ अनिष्टः स्वरः प्राप्नोति। तदर्थमुपदेशिवद्वचनं कर्त्तव्यं तेन परमपुमानित्ययं अन्तोदात्तो भवति। पुमानित्ययं पुरा धुदात्त एव।७
गोतोणित्। ७। गोशब्दात् परं सर्वनामस्थानं णिद्भवति। णित्कार्यं तत्र भवतीत्यर्थः॥ गौः। गावौ। गावः। तपरकरणं किं। चित्रगुः। का
र्हि चित्रगो हे चित्रगव इति। अंगवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति संबुद्धिगुणो जसो गुणे कृते णित्वं न भविष्यति अथवा गोत इति संबंध
लक्षणा षष्ठी गोतो यत् सर्वनामस्थानमिति। यत्तु तदर्थस्यैकत्वादिषु सर्वनामस्थानं तत्र गोतः सर्वनामस्थानमित्युच्यते। चित्रगुरि
२४ त्यादौ तु सर्वनामस्थानं तदन्यपदार्थस्यैकत्वादीनाह न गोतः। तपरकरणं तु भिन्नार्थमेव। केचित् गोतो णिदिति पठन्ति। तेन द्यौरित्यत्रापि २४
णिद्भवति। द्यौः। द्यावौ। द्यावः। गोत इत्येतदेव तपरकरणमोकारान्तोपलक्षणार्थमिष्टव्यं। वर्णनिर्देशेऽतः तपरकरणं व्यासितं।।७। णलुत्त
मो वा। ७। उत्तमो णल् वा णिद्भवति णित्कार्यं वा तत्र भवतीत्यर्थः। अहं चकार। अहं चकर। अहं पपाच। अहं पपच। पदे शब्दानि
दित्यर्थं वचनं।।७। सख्युरसंबुद्धौ।७। असंबुद्धौ यः सखिशब्दः तस्मात्परं सर्वनामस्थानं णिद्भवति। सखा। सखायौ॥ स
खायः। सखायं। सखायौ। असंबुद्धाविति किं। हे सखे। अनङ् सौ।७॥ सखिशब्दस्य संबुद्धिवर्जिते सौ परतोऽनङित्ययमादेशो भवति।
सखा। असंबुद्धाविति किं। हे सखे।७। ऋदुशनस्पुरुदंसोऽनेहसां च।७। ऋकारान्तानामंगानामुशनस् पुरुदंसस् अनेहस् इत्येते

षांत् संबुद्धौ सोपरतोऽनङ् ह्रस्वो न भवति। ऋकारांतानां। कर्ता। हर्ता। माता। पिता। उशनसादीनां उशना। पुरुदंसा। अनेहा। असंबुद्धावित्येव। हे
कर्तः। हे उशनः। हे पुरुदंसः। हे अनेहः। उशनसः संबुद्धावपि पक्षेऽनङ् इष्यते। हे उशनन्। नङि संबुद्ध्योरिति नलोपप्रतिषेधोऽपि पक्षे इष्यते। तथा
च वोक्तं। संबोधने तूशनसस्त्रिरूपं सांतं तथा नांतमथाप्यदंतं। माध्यंदिनिर्वष्टि गुणं त्विगंते नपुंसके व्याघ्रपदां वरिष्ठ इति। न परकरणं असंबो
धनार्थं॥ ७॥ तृज्वत्क्रोष्टुः॥ ८॥ क्रुशेस्तृच्प्रत्ययांतः संज्ञाशब्दः असंबुद्धौ सर्वनामस्थाने तृज्वद्भवति। तृजंतस्य यद्रूपं तदस्य भवतीत्यर्थः॥
रूपातिदेशोऽयं प्रत्यासत्तेश्च क्रोष्टोरेव तृजंतस्य यद्रूपं तदतिदिश्यते। तत्र क्रोष्टृ इति स्थिते॥ क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। क्रोष्टारं। क्रोष्टारौ॥
सर्वनामस्थान इत्येव। क्रोष्टून्। असंबुद्धावित्येव। हे क्रोष्टो। ७। स्त्रियां च। ८। क्रोष्टुशब्दः स्त्रियां तृज्वद्भवति। असर्वनामस्थानार्थ आरंभः
क्रोष्ट्री। क्रोष्ट्रीभ्यां। क्रोष्ट्रीभिः। क्रोष्टुशब्दं केचित् गौरादिषु पठंति। ङीषि परतस्तृज्वद्भावं कुर्वंति। तेषां पंचभिः क्रोष्ट्री
भिः कीतैरस्थैः पंच क्रोष्टृभिः रथैरिति स्त्रीप्रत्ययस्य लुकि कृते न सिध्यति। तत्र प्रतिविधेयं गौरादिषु न पठंति तेषां स्त्रियामित्यर्थ
निर्देशः स्त्रियां वर्तमानः क्रोष्टुशब्दस्तृज्वद्भवति। कृते तृजि देशे ऋन्नेभ्यो ङीबिति ङीप्प्रत्ययः। तत्रोदात्तयणो हल्पूर्वादिति क्रो
ष्ट्रीशब्दोंतोदात्तो भवति। ७। विभाषा तृतीयादिष्वचि। ८। तृतीयादिष्वजादिषु विभक्तिषु परतः क्रोष्टुशब्दस्तृज्वद्भवति। क्रोष्ट्रा। क्रोष्टुना।

क्रोष्ट्रा। क्रोष्ट्वे। क्रोष्टुः। क्रोष्ट्रोः। क्रोष्टुः। क्रोष्ट्रोः। क्रोष्ट्रोः। क्रोष्ट्रोः। क्रोष्टरि। क्रोष्ट्रौ। तृतीयादिष्विति किं। क्रोष्टून्। अनीति किं। क्रोष्टुभिः। तृ
१५ ज्वद्भावात् र्व्विधान्तर्त्वे धेनत्वमुत्त्वे ऽतो भवतः। प्रियक्रोष्टुने ब्राह्मणकुलाय। नुट्। प्रियक्रोष्टूनां ब्राह्मणकुलानां॥ छ। चतुरनडुहोरामुदा १५
त्तः॥ छ। चतुर् अनडुह् इत्येतयोः सर्वनामस्थाने परत आमागमो भवति। सर्वोदात्तोन्तेति। चत्वारः। चत्वारौ। चत्वारः। चत्वारं। चत्वा
रौ। अनड्वान्। अनड्वाहौ। अनड्वाहः। अनड्वाहं। अनड्वाहौ। तदंतविधिरत्रेष्यते। प्रियचत्वाः। प्रियचत्वारौ। प्रियानड्वान्। प्रियानड्वा
हौ। इत्यादि। स्त्रियां वेतिव्रक्रय्यां। अनड्वाही। अनडुही। गौरादिपाठात् ङीष्सिद्धः॥ छ। अम्संबुद्धौ॥ छ। संबुद्धौ परतश्चतुर् अनडुहोरम्
आगमो भवति। पूर्वस्यापवादः। हे प्रियचत्वः। हे अनड्वन्॥ छ। ऋत इद्धातोः॥ छ। ऋकारान्तस्य धातोरंगस्य इकारादेशो भव
ति। किरति। गिरति। आस्तीर्णं। अवि स्तीर्णं। धातोरिति किं। मातॄणां। पितॄणां। लौकिकस्यापि ग्रहणमिष्यते। चिकीर्षति। जिहीर्षति
तत्रापि वाथा स्यादिति धातुग्रहणं क्रियते। तपरकरणमसंदेहार्थमेव॥ छ। उपधायाश्च॥ छ। उपधाया ऋकारस्य इकारादेशो भ
वति। कीर्तयति। कीर्तयतः। कीर्तयन्ति॥ उदोष्ठ्यपूर्वस्य॥ छ। ओष्ठ्यः पूर्वो यस्मादृकारात्स ओष्ठ्यपूर्वः। तदंतस्य धातोरृकारादेशो भ
वति। पूर्त्तीः। पीडाः। बुभूर्षति। मुमूर्षति। सुस्मूर्षति। दंत्योष्ठ्यपूर्वस्यापि ग्रहणमिष्यते। वुवूर्षति मखिजः। प्रामुमूर्षति कुलं। आ

नि १

भ्रगतौ।१

ध्योत्र प्रत्यासत्तेरंगावयवो ऽस्य तेन तने रूनं भवति। समीर्मिमिति। इत्वोवा भ्यां गुणर[illegible] द्धी भवतो विप्रतिषेधेन। आस्तरणं आस्तारकः।
निरवरणं। निरावरकः॥ ७॥ बकुलं छंदसि। ७॥ छंदसि विषये ऽक्र कारीतेस्य धातोरंगस्य बकुलं उकारादेशो भवति। ओष्ठ्यपूर्वस्येत्यकं अ
नोष्ठ्यपूर्वस्यापि भवति। मित्रावरुणा ततुरिः। दुरेत्युधा जगुरिः॥ ओष्ठ्यपूर्वस्यापि न भवति। पप्रिभ्रतमं। ७॥ ७ [illegible] ७ [illegible]
इति श्रीवामनजयादित्यविरचितायां काशिकायां वृत्तौ सप्तमस्याध्यायस्य द्वितीयः पादः॥ ७। ७॥ ७॥ सिचि वृद्धिः परस्मैपदेषु॥ ७॥ सि
परस्मैपदपरे सिचि परतः इगंतस्यांगस्य वृद्धिर्भवति। अचैषीत्। अलावीत्। अनैषीत्। अपावीत्। अकार्षीत्। अहार्षीत्। अंतर
गमपि गुणं एषा वृद्धिर्बाधते वचनात्। न्यनुवीत्। न्यधुवीत्। इत्यत्र कुटादित्वात् ङिति सति प्रतिषि[illegible]द्धायां वृद्धौ कुवङा
देशः क्रियात। परस्मैपदेष्विति किं। अच्योष्ट। अप्लोष्ट। ७। अतो ल्रांतस्य। ७। रेफलकारौ यावतो तौ समीपौ तदं
गस्य अत एव स्थाने वृद्धिर्भवति। परस्मैपदपरे सिचि परतः। क्षर। अक्षारीत्। त्सर। अत्सारीत्। ज्वल। अज्वालीत्। ह्मल॥
अह्मालीत्। अतो हलादेर्लघोरिति तस्य विकल्पस्यायं अपवादः। अंत इति किं। न्यखोरीत्। न्यमीलीत्। ल्रांतस्येति किं। मा भवान
शीत्। मा भवानटीत्। अंतग्रहणं किं। अबभ्रीत्। अखल्लीत्। अत्रयोरेफलकारौ अंगस्यांतौ न तावतः समीपौ स्तः॥ ७। वदव्रजहलंतस्या

१६

16

वः॥ ७॥ वदव्रजोः॥ हलंतानां चांगानाम वः स्थाने वृद्धिर्भवति परस्मैपदपरे सिचि परतः। वद। अवादीत्। व्रज। अव्राजीत्। विकल्पबाधना-
र्थं वदव्रजिग्रहणं। हलंतानां। अपाक्षीत्। अभैत्सीत्। अरौत्सीत्। अत्र योगविभागे सति हलंतग्रहणं अंतरेणापि सिध्यति। कथं।
वदव्रज्योरित्यत्र प्रथमयोगे अत इति स्थानी अनुवर्त्तते। वदव्रज्योरतः स्थाने वृद्धिर्भवति। ततोऽवइति सूत्रं तत्रांगेनाऽविशेष्यते।
अंगस्यावः सिचि परतो वृद्धिर्भवति। तद्वत् हलग्रहणं हलः समुदायपरिग्रहार्थं इहापि यथा स्यात्। अरांक्षीत्। असांक्षीत्।
अन्यथा हि येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात्। इत्येकेन वर्णेन व्यवधाने स्यात्। अनेकेन हलानस्यात्। उदो-
वोढां। उदवोढमित्यत्र वहेः सिचि कृते सलोपादीनां रवेत्रासिद्धमित्यसिद्धत्वात् एवं हलंतलक्षणा वृद्धिः क्रियते। पश्चाद्ढ-
लोपनिमित्तं ओत्वं। तत्र कृतेषु न वृद्धिर्न भवति। कृतत्वात्। यत्नवत्कृता वृद्धिरोकारस्यैव तत्र भवति। सोढामित्यरि-
ति। नेटि॥ ८॥ इडादौ सिचि हलंतस्यांगस्य वृद्धिर्न भवति। अदेवीत्। असेवीत्। अकोषीत्। अमोषीत्। हल्ग्रहणं स्यात्तस्या-
त्येव। अलावीत्। अपावीत्। ननु चैतद्व्यंतरंगत्वात् गुणा वादेशायोः कृतयो हलंतं भवति। नेतदस्ति अंतरंगानपि

१६

गुणं एषा वृद्धिं विवनाद्बाध्यत इत्यर्थः ॥ छ ॥ ह्म्यंतक्षणश्वसजागृणिश्व्येदितां ॥ छ ॥ हकारांतानां मकारांतानां
यकारांतानां चांगानां क्षणश्वसजागृणिश्वि इत्येतेषां एदितां च इडादौ सिचि परस्मैपदपरे परतो वृद्धिर्न भवति । ग्रह ।
अग्रहीत् । स्यमु । अस्यमीत् । टुवमु । अवमीत् । व्यय । अव्ययीत् । क्षण । अक्षणीत् । श्वस । अश्वसीत् । जागृ । अजागा
रीत् । णि । औनयीत् । ऐलयीत् । श्वि । अश्वयीत् । एदितां । रगे । अरगीत् । लगे । अलगीत् । कखे । अकखीत् । ह्म्यंत
क्षणश्वसामेदितां च अतो हलादेर्लघोरिति विकल्पे प्राप्ते प्रतिषिध्यते । जागृणिश्वीनां तु सिचि वृद्धिः प्राप्ता सा
नेटीति न प्रतिषिध्यते । नेवांतरंगत्वादत्र एवं गुणो भवति । सिचि वृद्धेरनवकाशत्वात् । यदि च एवं गुणः स्याद्दि
जागृणिश्विग्रहणं अनर्थकं स्यात् । गुणो यादेशयोः कृतयोः यकारांतत्वादेव वृद्धिप्रतिषेधस्य सिद्धत्वात् तस्मादिदं एव णिश्वि
ग्रहणं ज्ञापकं न सिच्यंतरंगं अस्तीति । अथ जागृग्रहणं किमर्थं ॥ यावता जाग्रोऽविचिण्णल्ङित्स्विति जागर्तेर्गुणो वृद्धेरपवादो वि
धीयते । स यथा अवोचामेतीति वृद्धिं बाधते तथा सिचि वृद्धिमपि बाधिष्यते । नैतदस्ति । गुणो ह्यतेऽ[illegible]नोत्यांतस्येति या वृद्धिः सा

प्रतिसा तेन प्रतिषिध्यते। अथ तु गुणविधानसामर्थ्यादुत्तरकालभाविन्यपि वृद्धिर्गुणेन बाध्यते॥ यथा जागरयतीत्यत्रातउपधा
या इत्युपधावृद्धिर्न भवति। तथापि भल्लोः प्रतिषेधोऽर्थवान् भवति। तथा यज्ञाकाङ्क्षणं जागरग्रहणमकर्त्तुं न तत्क्रियते विस्पष्टार्थं॥ ७॥
17 ऊर्णोतेर्विभाषा॥ ७॥ ऊर्णोतेरिडादौ सिचि परस्मैपदे परवा वृद्धिर्न भवति। और्णावीत्। और्णवीत्। किं भाषो भीरित्यङित्वपक्षे वृद्धिर्विकल्प्यते।
ङित्वपक्षे तु गुणद्वारभावेन उवङ् भवति। और्णुवीत्॥ ७॥ अतो हलादेर्लघोः॥ ७॥ हलादेरङ्गस्य लघोरकारस्य इडादौ सिचि परस्मैपदे प
रे विभाषा वृद्धिर्भवति। अकणीत्। अकाणीत्। अरणीत्। अराणीत्। अत इति किं। अदेवीत्। असेवीत्। न्यकुटीत्। न्यपुटीत्। अत इ ॥२७॥
७ येतस्मिन्नसति स्थानिनिर्देशार्थं अत इत्येतदनुवर्त्तनीयं। तत्राकृतलक्षणा वृद्धिरिग्लक्षणा न भवतीति किं ति चेत् प्रतिषेधो न स्यात्॥
हलादेरिति किं। माभवानटीत्। माभवानशीत्। लघोरिति किं। अतक्षीत्। अरक्षीत्। अचेहकस्मान्न भव ति॥ अचकासीत्। येन
नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यादिति एकेन हलाव्यवधानमाश्रितं। अत्र पुनरङ्गेल्समुदायेन व्यवधानमस्तीति। वृद्धिर्न
भवतीति। अथ तु पुनरेकेन वर्णेन व्यवधान माश्रीयते। न पुनरनेकेनेति कल्प्यते। तदा जाग्रकं अकर्त्तुं लघोरिति॥
अतक्षीदित्यत्रानेकेन व्यवधानमिति वृद्धिर्न भवति। न तत्क्रियते विस्पष्टार्थं। इटीत्येव। आक्षीत्॥ ७॥ नेड्वशि कृति॥ ७॥ वशादौ कृति प्रत्यये

परतइडागमो न भवति। आर्धधातुकस्येड्वलादेरिति वक्ष्यति। तस्यायं पुरस्तादपवाद इति षे ध आरभ्यते। वरमनादौ कृतिप्रयोजनं। ईशिता। ई
शितुं। ईश्वरः। स्वेशभासेति वरच्। दीपिता। दीपितुं। दीप्रं। नमिकंपीति रः। भसिता। भसितुं। भस्म। अन्येभ्योपि दृश्यंत इति मनिन्। या
चिता। याचितुं। याञ्चा। यजयाचेति नङ्। वरमनादावित्युदाहरण प्रदर्शनार्थं। न परिगणनं। तेन यमंतादावित्येवमादावपि द्रष्टव्य
तिषेधो भवत्येव। अथ तत्र उणादयो बहुलमिति समाधीयते। संभवोदाहरण प्रदर्शनार्थमेतत्। कृतीति किं। रुदिवः। रुदिमः। सातिरुत्रतथासिसुस
रकसेषु च। सातिरुत्रत थ सि सु सर क स इत्येतेषु कृत्सु इडागमो न भवति। तीतिकि चा क्रिचोः सामान्येन ग्रहणं। किन्न। तनिता। तनितुं। तंतिः।
क्रिचू। दीपिता। दीपितुं। दीप्तिः। तु। सित निगमिमसिसच्यवि धाञ्कृषिभ्यस्तुन्। सविता। सवितुं। सक्तुः। त्र। दाम्नीशसयुयुजेति ष्ट्रन्। पतिता। पति
तुं। पत्रं। वाहनं। उणादिष्वपि सर्वधातुभ्यः ष्ट्रन्। तनिता। तनितुं। तंत्रं। त। हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन्। हसिता। हसितुं। हस्तः। लवि
ता। लवितुं। लोतः। पविता। पविता। पवितुं। पोतः। धर्विता। धर्वितुं। धूर्तः। औणादिकस्यैव तशब्दस्य ग्रहणमिष्यते। न पुनः क्तस्यापि। हसितमित्येव
यां २ मित्यादि तत्र निषेधो भवति। थ। हनिकुषिनीरमकाशिभ्यः क्थन्। कोषितौ। कोषितुं। कुष्ठं। काशिता। काशितुं। काष्ठं। सि। कुषा [illegible]
कुषिसिषि लषिभ्यः सिः। क्सिः। कोषिता। कोषितुं। कुक्षिः। सु। क्सुरेषः। एषिता। एषितुं। इक्षुः। सर। अशेः सरन्। अशिता। अशितुं। अक्षरं।

ति२

कंसइ ण भीका पा शल्यति मं षधि भ्यः कन्न। शस्तिता। शस्ति तुं। शा[illegible] न्कः। स वृ तृ वदि हनि कमि कषि पुसुषि भ्यः सः। वदिता। वदितुं॥
वत्सः। [illegible] तिउक्तेषु प्रस्तादीनामेव कृत्यं। प्रस्तादयो ग्रहण प्रकाराः। एतेषांइड्विकल्प उच्यते। निष्टृहीतिः। निकुषितिः। उपस्निहि-
तिः। निपठितिः। स्नती लेव। रोधिति। ॥ एकाच उपदेशेऽनुदात्तात्। ७। उपदेशे यो एकाचू धातुरनुदात्त श्चतस्माद्उत्तरस्य वलो
देरार्ध धातुकस्येडागमो न भवति। ब्रह्मल्या श्रयोयं प्रतिषेधः। के पुनरूपदेशे ऽनुदात्ताः। यत्तथा पठ्यंते। तए वं विस्पष्टा
र्थमिनिट्कारिकास्तु धवि भ र्न त्राः। प्रदर्श्यंते॥ अनिट्स्वरांतो भवतीति दृश्यतामिमां स्वसे टः प्रवदंतितद्विदः। अदंत मृदंत
मृतां च वृङ्वृञौ श्विडीङिवर्णेष्वथ शीङ्श्रिञ्। आवपि। मः। शागणस्थ मृदंतमुतां च रु स्नु वौ क्षु वं तथोर्णुतिमथो युणुक्ष्णु वः॥
इति स्वरांतानिपुणं समुच्चितास्ततो हलंतानपि मन्निबोधत। अचवदयूयातवः। स्वरांता व्यंजनांताश्च तत्र सर्वे स्व
रांता एकाचोनुदात्ता अदंतादीन् वर्जयित्वा। दाता। चेता। स्तोता। नेता। कर्ता। हर्त्ता। अदंतादयस्तु दात्ताः। आवधि षी च॥
आवधिष्ट। अदंताः। तरिता। तरितुं। अतां च वृङ्वृञौ। निवरिता। प्रावरिता। श्विडीङिवर्णेष्वथ शीश्रिञ्। आवपि। श्वयिता। डयि

दू १

१८ १८

ना। शयिता। आ श्रयिता। गणस्त्वमूदंतं। त्वयिता। पविता। कुतांवरुस्नुद्दुवं तथोणातिम थो युणुदनु वः। रविता। प्रस्नविता। श्र
विता। श्रोर्णविता। श्रोर्णुविता। वाच ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनं। आमश्च प्रतिषेधार्थमकारश्चेडुपग्रहादित्यनि
देशादेकाचूत्वमूर्णोतिरस्तीति उदात्तत्वमुपदिश्यते। यविता। नविता। दविता। इति स्वरांतानि पुंसमुच्चिनानस्नलो हलंता
नपि मन्निबोधत॥ शाकिस्तु कांते घनिडेकइष्यते घसिश्च सांतेषु वसिः प्रसारणी॥ घसिः प्रकृत्यंतरमस्ति। घस्ता। व
स्ता। प्रसारिणीति किं। वसिता वस्त्राणां। वसनिवास इत्यस्य यजादित्वात् संप्रसारणमुक्तिं न तु वस आच्छादन इत्यस्य॥
रभिश्च पांतेषु ॰थ मैथुने यभिस्तत्स्तती यो न्तुभिरेव नेतरे। आरब्धा। यब्धा। लब्धा। यभिर्यमंते घनिडेकइष्यते र
मिश्च यश्च रयानिपद्यते मनिः॥ नमिश्चतुर्थो हनिरेव पंचमो गमिस्तु षष्ठः प्रतिषेधवाचिनां॥ यंता। रंता। मंता।
स्य नीति किं। मनुते मीनिनेत्येव भवति। प्रणंता। हंता। गंता। दिहिर्दुहिर्मेहति रोहती वहिर् नहिश्च षष्ठो दहतिस्त्व

थाल्लिङ्गिः॥इमेनिटोष्टाविह मुक्तसंशया गणेषु ढांताः प्रविभज्यकीर्तिताः। दग्धा। दोग्धा। मेढा। आरोढा।
मुक्तसंशया इति किं। तत्रान्तरे न वा रापरे पठ्यते। स्निहि मुहि रिहि लुहि स्तुपः। तत्र स्नेहविकल्प स्त्राकारा दोन्तीवसरूति। मुहि
२८ रधिरपिरधादौ। ते न तौ ससंशयौ सविकल्पौ। इतरौ तु धातुषु न पठ्येते। केश्चिदभ्युपगम्येते। इति स्वरूपेणैव ससंशयौ। १८
दिशिं दृशिं दंशिमथो मृशिं स्पृशिं रिशिं रुशिं क्रोशति मष्टमं विशिं। लिशिं च शान्ता अनिटः पुराणगाः पठन्ति पाठेषु दशैव
नेतुरान्॥ देष्टा। द्रष्टा। दंष्टा। आम्रष्टा। आमर्ष्टा। ऋदुपधानामनुदात्तोपदेशानां म्हडिहत्रीवर्जीयिता। अनुदात्तस्य
चर्दुपधस्यान्यतरस्यामजमागमविकल्पः। स्रष्टा। स्पर्ष्टा। रेष्टा। [illegible]ष्टा। क्रोष्टा। प्रवेष्टा। लेष्टा। रुधिः सराधिर्युधिबं।
धिसाधयः क्रुधिक्षुधी शुध्यति बुध्यती व्यधिः। इमे तु धान्तादश चानिटो मतास्ततः परं सिध्यतिरेव नेतरे॥ रो[illegible]द्धा॥
राद्धा। योद्धा। बंद्धा। साद्धा। क्रोद्धा। क्षोद्धा। शोद्धा। बोद्धा। व्यद्धा। बुध्यतिसिध्यत्योः श्यनानिर्देशादन्यविकरणयोर्बुद्धि

सिध्योरिडुवत्येव। बोधिता। सेधिता॥ निष्ठायामेवेति षिधो भावात् बुधिसिधितमिति भवत्येव॥ शिषिं पिषिं पुष्यति पुष्यती तिषिं।
विषिं श्लिषिं तुष्यति दुष्यती द्विषिं। इमां दशैवोपदिशांत्यनिट्सु योगणेषु षंतान्ह्रषिकर्षती तथा॥ शेष्टा। पेष्टा। शोष्टा। पोष्टा।
तेष्टा। वेष्टा। श्लेष्टा। तोष्टा। दोष्टा। द्वेष्टा। क्रोष्टा। कर्ष्टा। आकर्ष्टा। कृषेस्तौदादिकस्य भौवादिकस्य च कृषिकर्षती। इतिनिर्देशात्।
शः। तपिं तिपिं चापिमथो वपिं स्वपिं लिपिं लुपिं तृप्यति दृप्यती सृपिं। स्वरेण नीचेन शपिं छुपिं क्षिपि प्रतीहि पांतान् पठितान् स्त्रयोदश।
तप्ता। तेप्ता। आप्ता। वप्ता। स्वप्ता। लेप्ता। लोप्ता। तृप्यति दृप्यत्योरनुदात्तत्वं अमागमार्थं। इट्त्वं तयोः रधादिपाठाद्विकल्पेन भ-
वति। त्रप्ता। तर्प्ता। तर्पिता। द्रप्ता। दर्प्ता। दर्पिता। तुदादि सृपेश्चापि ह्रपि सृपिद्दुपीतावुदात्तावेव। स्रप्ता। सर्प्ता। शप्ता। छोप्ता। क्षेप्ता॥ अदिं हदिं।
स्कंदिं भिदिं छिदिं ह्निदिं तुदिं नुदिं पदिं सदिं स्विद्यतिं विंधं पद्यती खिदिं। क्षुदिं शुदिं विद्यतिं विंद इत्यपि प्रतीहि निंदानान्दश पंचवानिटः। अ-
त्ता। हत्ता। स्कंत्ता। भेत्ता। छेत्ता। क्षोत्ता। शत्ता। सत्ता। खेत्ता। स्विद्यती श्यनानिर्देशात् ञिष्विदा इत्यस्य निवृत्त्यर्थं। उदात्तत्वाय। पू-
त्ता। खेत्ता। तोत्ता। नोत्ता। वेत्ता। वेत्ता। विद्यति विंद इति श्यनाश्नमानिर्देशोऽन्याधिकरणनिवृत्त्यर्थः। वेत्तिविंदतीति उदात्तावेव॥ वि

दिताविधायाः। वेदिताधनस्य। पविंववि॑विविशिरिविरंडि छ छतीन्निडिंसि[illegible]विं मुंचि भडि भंडि भञ्जती र्। त्यडिं यडिं यु डि रु
डि संडि मज्जतीन्। भुडिं स्वडिं स्फुडि मडि विध्यनिट् स्वरान्। पक्ता। वक्ता। विवेक्ता। रेक्ता। रैंक्ता। व्रष्टा। निर्णेक्ता। सेक्ता। मो
क्ता। भक्ता। भंक्ता। भ्रष्टा। त्यक्ता। यष्टा। योक्ता। रोक्ता। आसंक्ता। मंक्ता। भोक्ता। परिष्वंक्ता। स्वप्ता। सप्ता। मृडिर यम
२० दिव्यक्ष्यते। ततो विकल्पेन भवितव्यं। माष्टी। माडि तेत्यमागमो न दृश्यते। तद्दिदास्य पाठे प्रयोजनं चिंत्यं। केचित्तस्य स्थाने। २०
विडिं पठंति। स्फुडि विडि विध्यनिट् स्वरान्। नाति। निजादिषु यो विडिरसावनिड् इष्यते। तथा च ग्रंथांतरे। निजिविजि
रंजीन्। निष्पक्तं। एकाच इति किं। अवधीत्। हन्तीति हत्यर्थमिदं नो वधिरूपं दृश्यते। उपदेशग्रहणं किं। इट् स्वयथा।
स्यात्। लविष्यति। पविष्यति। इट् मा भूत्। कर्तौ किट। न्। कर्तुमिति। ॥ श्युकः किति। ॥ श्रि ग्रह इत्येतस्य उगंतानां च किति
प्रत्यये परत इडागमो न भवति। श्रित्वा। श्रितः। श्रितवान्। उगंतानां। युत्वा। युतः। युतवान्। लूत्वा। लूतः। लूतवान्। हृत्वा।
हृतः। हृतवान्। तीर्त्वा। तीर्णः। तीर्णवान्। श्युक इति किं। विदितः। किनीति किं। श्रयिता। श्रयितुं। श्रयितव्यं। केचिद्‌त्रादिककारानिर्देशेन गकार

रघश्लेषं व॰र्मयंति। नूक्ष्णुरित्यत्रापि यथा स्यात्। सोत्रला त्रनि देशस्य थ्यककिनीत्यत्र वर्लस्य असिद्धत्वं अनाश्रित्य रोरुत्वं नद्धत्तांव
सर्ज्जनीय श्चरुतश्रति। ग्लाडिस्व स्थ क्ष्णुरित्यत्र स्था आइत्याकारप्रश्लेषेण स्थास्नाः सिद्धत्वा न्नाकिंचिदेतत्। उपदेशोइत्येव। ती
र्णइत्यत्रापि यथा स्यात्। इत्वोत्वहकेनेर परत्वे येन स्यात्। मा भूदेवं। इड् सनि वेति विकल्पविहितेन यस्य विभाषेति निषेधायामयं प्रतिषेधाभ
विष्यति। कस्य पुनः साधि भोषा। द्रृत। य घो वेइत्वेहेतेनायं त्रकारांतो भवति। स्थानिवद्भावाइवाते। अनल्विधौ स्थानिवद्भावः। अल्विधिरयं
तस्मादनुवर्त्तय त्युवर्यं उपदेशाइति। तथा च सति जागरितः। जागरितवानित्यत्रापि जायते। तदर्थं ए का ऽनुवर्त्तयितव्यं। ऊर्णोते
स्त्रा। वाच्य ऊर्णोर्णुवद्भावो यङ् प्रसिद्धिः प्रयोजनं। आमश्च वृतिषेधार्थं एकाचश्चोडुपग्रहात्। प्रोर्णुतः। प्रोर्णुतवान्। ॥ सनिग्रहगुहोश्च॥
ग्रह गुह इत्येतयोरुगंताच्च सनि परत इडागमो न भवति। जिघृक्षति। जुघुक्षति। उगंतानां। उरुदुषति। रुरूषति। लुलूषति। श्रिस्वृयू
र्णुभरज्ञपिसनामिति विकल्पविधानात् श्रयतिरत्र नानु कृष्यते। ॥ कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि॥ ॥ कृ सृ भृ वृ स्तु द्रु स्रु श्रु इत्येते
षां लिटि प्रत्ययपरत इडागमो न भवति। कृ चकृव। चकृम। सृ ससृव ससृम। भृ बभृव बभृम। वृ ववृव ववृम। स्तु तुष्टुव तुष्टुम। द्रु
दुद्रुम। स्रु सुस्रुव सुस्रुम। श्रु शुश्रुव शुश्रुम। सिद्धे सत्यारंभो नियमार्थः। क्रादय एव लिटि अनिटः ततोन्ये लिटि सेटः। बिभिदिव बा

जिदिम। अनुदात्तोपदेशानामत्र प्रकृत्याश्रयः प्रतिषेधः। इड्इत्यो स्तुप्रत्ययाश्रयः। तद्भञ्जस्यायं नियमः। अद्य जोरिथ लिव वर्थेति
21 निपातनात् व्यवस्था। स्कुड्डुस्तुश्रुवां तु अतो भारद्वाजस्येति एतस्मादपि नियमादिट् प्राप्ति सोपि नेष्यते। तुष्टोथ। दुद्रोथ। सुस्रो
थ। शुश्रोथ। सस्त्रोस्तुटइतिवक्तव्यं। सस्तुद्रुस्यइडागमो यथा स्यात्। संचस्करिव। संचस्करिम। अतो भारद्वाजस्येत्येतदपि असुद्ग
एवेष्यते। संचस्करिथ। ॥ श्वीदितो निष्ठायां ॥ श्वयतेरीदितश्च निष्ठायामिडागमो न भवति। शूनः। शूनवान्। ईदितः। ओलजी। २१
२१ लग्नः। लग्नवान्। निष्ठायामिति नकारः। दीपी। दीप्तः। दीप्तवान्। ओड्ड उ० दितां मध्ये पाठो ज्ञापकं निष्ठायामनित्यस्य। सहितन्वार्थः। न तर्हि निष्ठा
नकारस्य उ० दितो ऽनन्तरस्य विधीयते। उड्डीनः। उड्डीनवान्। ॥ यस्य विभाषा ॥ यस्य क्वचिद्विभाषा इट् कृतः विड्डकस्तस्य निष्ठायामिडागमो
न भवति। वक्ष्यति रधादितो वा। विधूतः। गुहू। गूढः। गूढवान्। उदितो वा। दृधु। दृढः। दृढवान्। तनिपतिदरिद्राणामुपसंख्यानम्। तनिपते
र्विकल्पितेट्कस्याप्यादितीपाश्रितानीति पतितेति निपातनादिडागमः। ॥ आदितश्च ॥ आदितश्च धातोर्निष्ठायामिडागमो न भवति। ञिमिदा
मिन्नः। ञिक्ष्विदा। क्ष्विण्णः। वकारो नुकसमुच्चयार्थः। आश्वस्तः। वांतः। योगविभागकरणं किं। आदितश्च विभाषा भावादिकर्मणोरिति व

क्त्वं । अन्यत्र भावादिकर्मभ्यां यस्य विभाषेति प्रतिषेधो भविष्यति । ज्ञापकार्थं । एतत्ज्ञापयति । यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति । तेन
विभाषा गमहनविदविशामित्यत्र विदेर्लाभार्थस्य विभाषेति ज्ञानार्थस्य प्रतिषेधो न भवति । विदितः । विदितवान् ॥ विभाषा भावादिकर्मणोः ॥१७॥
भावे आदिकर्मणि च आदितो धातोर्विभाषा निष्ठायामिडागमो न भवति । मिन्नमनेन । मेदितमनेन । प्रमिन्नः । प्रमेदितः । सो-
ढा गाः कर्मणि निष्ठायां शकेरिटं इच्छन्ति विकल्पेन । शकितो घटः कर्तुं । शक्तो घटः कर्तुं । भावे न भवत्येव । शक्तमनेन । अस्यते भावे । असि-
तमनेन । कर्मणि तु न भवत्येव । अस्तः काण्डः ॥ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्व-
रानायासभृशेषु ॥ क्षुब्ध । स्वान्त । ध्वान्त । लग्न । म्लिष्ट । विरिब्ध । फाण्ट । बाढ । इत्येते निपात्यन्ते । मन्थ । मनस् । तमस् । सक्त । अविस्पष्ट ।
स्वर । अनायास । भृश । इत्येतेष्वर्थेषु । क्षुब्ध इति भवति । मन्थाभिधानं चेत् । क्षुभितमन्यत् । क्षुभितः समुद्रः । क्षुभितं मन्थेन । क्षुब्धा गिरि-
नदीत्येवमादि तूपमानाद्भवति । स्वान्तमिति भवति मनोभिधानं चेत् । स्वनितो मृदङ्गः । स्वनितं मनसा । ध्वान्तमिति भवति । तमोभिधानं
चेत् । ध्वनितो मृदङ्गः । ध्वनितेन तमसा । लग्नमिति भवति । सक्तं चेत् । लगितमन्यत् । म्लिष्टमिति भवति । अविस्पष्टं चेत् । म्लेच्छितमन्यत् ।
इत्वं अपि ऐकारस्य निपातनादेव । विरिब्धमिति स्वरश्चेद्भवति । विरेभितमन्यत् । रेभृ शब्दे इत्येतस्यैतन्निपातनात् । अन्ये विरिभितमन्यदिति प-

९२ ङुंति। रिञ्जिं वसोत्रमेव धातुं वर्णयंति। पी फांटमिति भवति। अनायासभ्येतत्। फणितमन्यत्। अनायासभ्यं यदभ्रष्टतमपिवृंकवायमुद
कसंपर्कमात्राद्विभक्तमीषद्दुष्टं तत्फांटं। अल्पप्रयत्नसाध्यत्वादनायासेन लभ्यं स्यते। बाढमिति भवति। भृशं चेत्। बाढितमन्य
२२ त्। बाहृ प्रयत्न इत्येतस्य धातोरेतन्निपातनं। अतिशयश्च प्रयत्नामिहोच्यते। छ धृषिशसीवैयात्ये। छ॥ वियातस्य भावो वैयात्यं। प्रागल्भ
भ्यं अविनीतता। तत्र धृषिशसी इत्येतयोर्निष्ठायामिडागमो न भवति। धृष्टो यं। शस्तोयं। धृषेरादितश्चेति प्रतिषेधः प्रसिद्ध एव। २२
तथा शासेरपि उदितो वेति यस्य विभाषेति। नियमार्थं वचनं। धृषिशस्योर्वैयात्य एवेण्न भवति। भावादिकर्मणोरपि वैयात्ये धृषिर्नास्ति। वै
यात्य इति किं। धर्षितः। विशसितः। छ। दृढः स्थूलबलयोः। छ। दृढ इति निपात्यते। स्थूले बले च भवति चेत्। दृढः स्थूलो दृढो बलवान्। किमत्र निपा
त्यते। दृहेः क्तप्रत्यये इडभावः। हकारनकारयोर्लोपः। परस्य ढत्वं। अथ दृहिः प्रकृत्यंतरमस्ति। तस्याप्येतदेव सर्वं नलोपवर्जं। नकारस्य
अभावात्। हलोपनिपातनं पूर्वत्रासिद्धत्वनिवृत्त्यर्थं। हलोपे हि सति तस्य पूर्वत्रासिद्धत्वात् ढ्रुलोपे मा भूत्। दृढीयान्। दृढयतीत्यत्र रभावे हलोहलि तो८
धातिनिरपेक्षो न स्यात्। इदं च परिदृढ इत्यत्र गतमिति न्यायपि लभ्यं ध्रुवदित्ययादेशो न स्यात्। इदं च परिदृढ स्यापत्यं कन्या पारिदृढीक
न्यैति गुरूपोत्तमलक्षणः ष्यङ् इत्येव सञ्ज्ञात। स्थूलबलयोरिति किं। दृहितं। दृंहितं। छ प्रभोपरिवृढः। छ॥ परिवृढ इति निपात्यते। प्रभु

श्चेदृढ इति। परिवृढः। कुटुंबी। श्रेणिसमानं। वृंहेर्निपातनमेतत्। वृहिश्च यदि भ्वादिस्थं तरमस्ति। तदा तस्यापि पूर्ववत्। इलोपनिपातनस्य च तदेव प्र
योजनं। परिवृढयति। परिवृढस्य गत इति पारिवृढी कन्येति। परिवृढमाचष्ट इति विगृह्य वृढशब्दादेव णिजुत्पद्यते। संग्रामयते रेव सोपसर्गादुत्प
त्तिरिष्यते। नान्यस्मादिति। तथा च सति परिवृढयतीति डुः तिङः इति निर्धार्यतः। परिवृढस्य गत इत्यत्र पारिवृढस्य काप्रत्ययांतेन सह समासे सति।
त्यवादेशाः सिद्धा भवति। अभावितिकिं। परिवृंहितं। परिवृढितं। [illegible] कृच्छ्रगहनयोः कषः। छ। कृच्छ्रगहने इत्येतयोरर्थयोः कषधातोर्निष्ठायामिड्
डागमो न भवति। कष्टोग्निः। कष्टं व्याकरणं। ततोपि कष्टानि सामानि। कृच्छ्रं दुःखं। तत्कारणमप्याहितकं कृच्छ्रमुच्यते। गहने। कष्टा
नि वनानि। कष्टाः पर्वताः। कृच्छ्रगहनयोरिति किं। कषितं कनकं। छ। घुषिरविशब्दने। छ। घुषेर्धातोरविशब्दने निष्ठायामिडाग
मो न भवति। घुष्टा रज्जुः। घुष्टौ पादौ। हो अविशब्दन इति किं। अवघुष्टं घुषितं वा वाक्यमाह। विशब्दनं प्रतिज्ञानं। घुषिरविशब्दार्थ इति भूवा
दिषु पठ्यते। घुषिर् विशब्दन इति चुरादिषु। द्वयोरपि इह सामान्येन ग्रहणं। विशब्दन प्रतिषेधप्रतिषेधश्च ज्ञापकं चुरादिषु णिचो विक
ल्पनार्थस्यानित्यत्वे इति। तेनाश्रयं अपि प्रयोग उपपन्नो भवति। तथा महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवा इति। स्वामिनाश्रयं शब्देना

विस्तृतवंतइत्यर्थः॥ छ॥ अर्देः संनिविभ्यः॥ छ॥ संनिवि इत्येतेभ्य उत्तरस्यार्देर्निष्ठायामिडागमो न भवति। समर्णः। न्यर्णः। व्यर्णः। संनिवि
भ्य इति किं। आर्दितः। अभेश्चाविदूर्ये॥ छ॥ अभिशब्दादुत्तरस्य अर्दे रविदूर्यर्थे निष्ठायामिडागमो न भवति। अभ्यर्णे शेते। अभ्यर्णा सेना।
२३ अभ्यर्णा शरत्। अविदूर्य इति किं। अभ्यर्दितो वृषलश्शीतेन। पीडितो वृषल इत्यर्थः। विदूरमिति विप्रकृष्टं। ततोऽन्यदविदूरं। तस्य भावः आवि २३
दूर्यं। एतस्मादेव निपातनात् ननञ्पूर्वात्तत्पुरुषादित्युत्तरस्य भावप्रत्ययस्य प्रतिषेधो न भवति॥ छ॥ णेरध्ययने वृत्तं॥ छ॥ ण्यन्तस्य वृत्तेर्निष्ठायां अध्य
यनेऽर्थे वृत्तमिति इडभावो णिलुक् च निपात्यते। वृत्तो गुणो देवदत्तेन। वृत्तं पारायणं। अध्ययन इति किं। आवर्तितमन्यत्। वृत्तिरयमकर्मकः। सण्यर्थे वर्त्तमानः
सकर्मको भवति। तेन निर्वृत्तमिति च वृत्तेर्ण्यन्तार्थवृत्तेरेव कर्मणि क्तप्रत्ययो दृश्यते। तद्विहापि ण्यर्थवृत्तेरेव वृत्तो गुणो देवदत्तो न भविष्यतीति
निपातनमनर्थकं। नत् क्रियते। एतानि चैव ण्यर्थोऽभिधीयते। तदावर्त्तितइति अध्ययने मा भूदिति केचित्। अपरे तु वर्त्तितो गुणो देवदत्तेनापीछंति।
॥ छ॥ वा दान्तशान्तपूर्णदस्तस्पष्टछन्नज्ञप्ताः॥ छ॥ णेरित्यनुवर्तते। दान्त शान्त पूर्ण दस्त स्पष्ट छन्न ज्ञप्त इत्येतेषां ण्यन्तानां धातूनां निष्ठायां वा इ
डभावो निपात्यते। दान्तः। दमितः। शान्तः। शमितः। पूर्णः। पूरितः। दस्तः। दासितः। स्पष्टः। स्पाशितः। छन्नः। छादितः। ज्ञप्तः। ज्ञापितः। इ

दृढमिति चेद्योणि त्वुकु वनि पात्यते। इष्टेस्तु भरहमपि सनामितिविकल्पविधानात् यस्य विभाषेति नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं निपातनं।२७॥ रुष्यम
त्वरसंघुषास्वनां।२८। रुषि अम त्वर संघुष आस्वन इत्येतेषां निष्ठायां इडागमो वा न भवति। रुष्टः। रुषितः। तीषसहलुभरुषरिष इति विकल्प
विधानात् यस्य विभाषेति प्रतिषेधे प्राप्ते विकल्प उच्यते। अभ्यान्तः। अभ्यमितः। तूर्णः। त्वरितः। आदितश्चेति प्रतिषेधः प्राप्तः। संघुष्टं वाक्यमा
ह। संघुषितं वाक्यमाह। संघुष्टौ दम्यौ। संघुषितौ दम्यौ। संपूर्वस्य घुषेरविशब्दनेपि परत्वाद् यं विकल्पो भवति। आस्वान्तो देवदत्तः। आस्वनितो देवदत्तः।
आस्वान्तं मनः। आस्वनितं मनः। आङ्पूर्वस्य स्वनेर्मनोभिधानेपि परत्वाद् यं विकल्पः। क्षुब्धस्वान्तेति निपातनं बाध्यते।२८। हृषेर्लोमसु।२९। लोमसु वर्त
मानस्य हृषेर्निष्ठायां वा इडागमो न भवति। हृष्टानि लोमानि। हृषितानि लोमानि। हृष्टं लोमभिः। हृषितं लोमभिः। हृष्टाः केशाः। हृष्टं केशैः। हृषितं के
शैः। हृषु अलीके इति उदित्वान्निष्ठायामनिट्। हृष तुष्टाविति यं सेट्। तयोरुभयोरपि ग्रहणं। इति तु यत्र विभाषेत्ययं। लोमानि मूर्धजानि अंगजा
नि इह सामान्येन गृह्यन्ते। यथा लोमनखं स्पृष्ट्वा शौचं कर्तव्यमिति। तद्विषये च हर्षे हृषिर्वर्तमानो लोमसु वर्तत इत्युच्यते॥ लोमस्विति किं। हृष्टो देवदत्तो
इत्येवं अलीकार्थस्य। हृषितो देवदत्त इति तुष्ट्यर्थस्य। विस्मितप्रतिघातयोश्चेति वक्तव्यं। हृष्टो देवदत्तः। हृषितो देवदत्तः। विस्मित इत्यर्थः। हृष्टा

त५

दंताः हषिता दंताः। प्रतिहता इत्यर्थः। छू॥ अपचितश्च। छू॥ अपचित इति वा निपात्यते। अपपूर्वस्य चायतेर्निष्ठायामि नि ट्ट्वं चि भावश्च निपात्यते। अ
पचितोऽनेन गुरुः। अपचायितः। क्तिनि चिभावो वक्तव्यः। अपचितिः। छू॥ हृ ह्वरेश्छंदसि। छू॥ ह्वरेः छंदसि विषये निष्ठायां हृ इत्ययमादेशो भव
२८ ति। हृतस्य वा ह्वृतस्य च। अहृतमसि हविर्धानं। छंदसीति किं। ह्वृतं। छू॥ अपरिह्वृताश्च। छू॥ अपरिह्वृता इति निपात्यते। छंदसि विषये। हृ इत्यादेशस्या २८
भावो निपात्यते। अपरि[ह्वृ]ताः सनुयाम वाजं। छू॥ सोमे ह्वरितः। छू॥ ह्वरित इति निपात्यते। ह्वरतेर्निष्ठायामिडागमो गुणश्च निपात्यते।
छंदसि विषये। सोमश्चेद्ह्वृति मानः। सोमो ह्वरितो विह्वरः स्यां। छू॥ ग्रसित स्कभित स्तभित उत्तभित चत्त विकस्त विशस्त शंस्त शास्त तरुत् त्रं ५
तरूत वरुत वरूत वरूत्री उज्ज्वलिति क्षरिति क्षमिति वमिति अमितीति च। छू॥ ग्रसित। स्कभित। स्तभित। उत्तभित। चत्त। विकस्त। विशस्त। शंस
स्त। शास्त। तरुत। तरूत। वरुत। वरूत। वरूत्री। उज्ज्वलिति। क्षरिति। क्षमिति। वमिति। अमिति। इत्येतानि छंदसि निपात्यंते। ग्रसित स्कभित स्त
भित उत्तभित इति ग्रसु। स्कंभु। स्तंभु इत्येतेषां उदित्वान्निष्ठायामिट्प्रतिषेधः प्राप्त इडागमो निपात्यते। ग्रसितं वा एतत्सोमस्य। ग्रस्तमिति ग्रसित३
भाषायां। स्कभितं। विष्कभिते अजरे। विस्कब्धमिति भाषायां। स्तभितं। येन स्व स्तभितं। स्तब्धमिति भाषायां। उत्तभितः। सत्येनोत्तभिता भूमिः। उ
त्तब्धमिति भाषायां। उत्तभिते त्यत्र उत्पूर्वस्यान्निपातनसामर्थ्यादन्योपसर्गपूर्वस्य स्तभित शब्दो न भवति। चत्त विकस्त इति। चत्ते: कमेश्च विपूर्व

त्रं ५

स्यनिष्ठायामिड्भावो निपात्यते। वृत्रावर्षेण विद्युतः। चतितेति भाषायां। उत्ता नापाहृदयं यद्विकस्तं। विकसितमिति प्राप्ते। निपातनं बकुवापसंबकुव न
नं विकस्ताइति। अपरे तु निपातनेषु प्रत्ययेकं विभक्तिनिर्देशः। विशास्त्रं शंस्त्रं शास्त्रं इति शासे विकिं हृवस्य शंसेः शासे प्रत्ययेचिड्डभावो नि
पात्यते। विशास्त्र कं एक स्त्वे ह्युरश्वस्याविशास्त्वा। विशासितेति भाषायां। शंस्त्र ग्रावग्राभ उशंस्ता। शंसितेति भाषायां। शास्त्र प्रशास्ता।
पोता। प्रशासितेति भाषायां। तरूतृ तरूतृ वरूतृ वरूतृ। वरूत्री रिति तरतेर्वृङ्वृञोश्चतृचि उट् ऊट् इत्येतावादेशागमौ निपात्येते। तरूतारं
रथानां। तरूतारं रथानां। तरितारं तरीतारं इति भाषायां। वरूतारं वरूतारमिति। वरितारं वरीतारमिति भाषायां। वरूत्रीश्वादेवीर्विश्वदे
व्यावतीः। आसिद्ध वेसवमोश्चारणं व्रयागदर्शनार्थं। तशीतं तं। तेनेदमपि भवति। भवति। अहोरात्राणि वेवरूत्रयइति छंदसमचकृस्चतं।
ल्तेरूतरएवं स्यहारवम अम इत्येतेषां वति पिशापइका देरादेशा। निपात्यते। शापो लुकि वा इडागमः। अग्निरूडिश्वल्तिति। ऊध्वं ज्वलितीव
ति भाषायां। स्तोकं क्षरिति। क्षरतीति भाषायां। सोमं वमिति। वमितीति भाषायां। अभ्यमितिवरुणः। अभ्यमितिति भाषायां। इतिकरणं प्र।

नियमार्थे ॥

दर्शनार्थं । तेन कश्चिद्दीकारोपि भवति । चितमभ्यमीति वरूण इत्यपि द्रिश्य वेष्विदं पठ्यते । छ । आर्द्धधातुकस्येड्वलादेः । छ । आर्द्धधातुका

25 स्य वलादेरिडागमो भवति । भविता । भवितुं । भवितव्यं । आर्द्धधातुकस्येति किं । आस्ते । वस्ते । शेते । रुदादिभ्यः सार्वधातुके इष्यते ।

स्मिन्नुविकृतौ ज्ञायमाने प्रतिपत्ति गौरवं भवतीति आर्द्धधातुकग्रहणं क्रियते । वलादेरिति किं । भव्यं । भवनीयं । इ डितिवर्तमाने पु २५

२५ नरिड्ग्रहणं प्रतिषेधनिवृत्त्यर्थं । छ । स्नुक्रमोरनात्मनेपदनिमित्ते । छ । स्नुक्रमोरार्द्धधातुके वलादेरिडागमो भवति । न चेत्स्नुक्र

मी आत्मनेपदस्य निमित्तं भवतः । क्व च तावात्मनेपदस्य निमित्तं । यत्रात्मनेपदं तदाश्रयं भवति । भावकर्मकर्तृकर्मकर्मव्यतिहाराः । क्रमश्च वृत्त्या

दयश्च । तेनायं सत्यात्मनेपदे प्रतिषेधो नासति । प्रतिषेधफलं तु नेदं सूत्रं । स्नुक्रमारुदात्तत्वादिट्सिद्ध एव । प्रस्नविता । प्रस्नवितुं । प्रस्नवि

तव्यं । क्रमिता । क्रमितुं । क्रमितव्यं । अनात्मनेपदनिमित्त इति किं । प्रस्नोषीष्ट । प्रक्रंसीष्ट । प्रस्नोष्यते । प्रक्रंस्यते । प्रविक्रंसिष्य

ते । सर्वत्रैवात्र स्नौतिः क्रमिश्चात्मनेपदस्य निमित्तं । सनंतादपि पूर्ववत्सनइत्यात्मनेपदं विधीयते । निमित्तग्रहणं सीयुट्स्त ङा२

(परपरस्य च प्रतिषेधार्थं । इदं तु प्रस्नविते । वा चरति प्रस्नाविजीयत इति क्यङंतमात्मनेपदस्य निमित्तं । न स्नौति ॥ क्रमः स्को हं क

नर्यात्मनेपदविषयात्। असत्यात्मनेपदे इति प्रतिषेधो वक्तव्यः। प्रक्रंता। उपक्रंता। कर्त्तरीति किं। प्रक्रमितव्यं। उपक्रमितव्यं। आत्मनेपदविष
याद् इति किं। निःक्रमिता। स्नोनेः सनि किति च वलयये परतः श्र्युकः किति सनि यकृगुरोश्चेति प्रतिषेधो भवति। प्रस्नु स्नूषति॥ प्रस्नुस्नु
नः। प्रस्नुतवान्॥ छं॥ ग्रहोऽलिटि दीर्घः॥ छ॥ ग्रहेरुत्तरस्य इटो ऽलिटि दीर्घो भवति। ग्रहीता। ग्रहीतुं। ग्रहीतव्यं। अलिटीति किं। जग्रहि
व। जगृहिम। वृ इत्यस्य तस्य इटो दीर्घत्वमिदं। चिण्वदिटो न भवति। ग्राहिता। ग्राहिष्यते। छं। वृतो वा॥ छ॥ वृ इति वृङ् वृञोः सामान्येन ग्र
हणं। तस्मादुत्तरस्य ऋकारान्तेभ्यश्च इटो वा दीर्घो भवति। वरिता। वरीता। प्रावरिता। प्रावरीता। ऋकारान्तेभ्यः। तरिता। तरीता। आस्तरि
ता। आस्तरीता। वृत इति किं। करिष्यति। छं। न लिङि। छं। वृत उत्तरस्य इटो लिङि न दीर्घो भवति। वरिषीष्ट। प्रावरिषीष्ट। आस्तरिषीष्ट। विस्तारिषी
ष्ट। वतरिषीष्ट॥ छ॥ सिचि च परस्मैपदेषु। छं॥ परस्मैपदपरे सिचि परतो वृत उत्तरस्येटो दीर्घो न भवति। प्रावारिष्टां। प्रावारिषुः। व्यस्तारिष्टां॥
व्यस्तारिषुः। परस्मैपदेष्विति किं। प्रावरिष्ट। प्रावरीष्ट। छं। इट् सनि वा। छं॥ वृत उत्तरस्य सनो वा इडागमो भवति। वुवूर्षति। न। विव
रिषते। विवरिषते। विवरीषते। प्रावुवूर्षति। प्राविवरिषति। प्राविवरीषति। तितीर्षति। तितरिषति। तितरीषति। आतिस्तीर्षति। आतिस्त
रिषति। आतिस्तरीषति। सनि ग्रहगुहोश्चेति इट्प्रतिषेधे प्राप्ते पक्षे इडागमो विधीयते। इट् च्छदे तावेति पक्षे दीर्घः। चिकीर्षति। जि

दीर्षति। इत्यत्र उपदेशाधिकारात् आर्धधातुकत्वाच्च इडागमो न भवति॥ ऌर्लिङ्सिचो रात्मनेपदेषु। छ। वृतो लिङ्सिचि आत्मनेपदपरे इ
डागमो नैव भवति। वृषीष्ट। वरिषीष्ट। प्रावृषीष्ट। प्रावरिषीष्ट। आस्तीर्षीष्ट। आस्तरिषीष्ट। सिचः। सैव स्थापि। अवृत। अवरिष्ट। अव
रीष्ट। प्रावृत। प्रावरिष्ट। प्रावरीष्ट। आस्तीर्ष्ट। आस्तरिष्ट। आस्तरीष्ट। आत्मनेपदेष्विति किं। प्रावारिष्टां। प्रावारिषुः। छ।। ऋतश्च
संयोगादेः। छ।। ऋकारान्तात् धातोः संयोगादेरुत्तरयोर्लिङ्सिचोरात्मनेपदेषु वा इडागमो न भवति। धृषीष्ट। धरिषीष्ट। स्मृ
२६ षीष्ट। स्मरिषीष्ट। अध्वृषातां। अध्वरिषातां। ऋत इति किं। च्योषीष्ट। च्योषी अच्योष्ट। संयोगादेरिति किं। कृषीष्ट २६
अकृषत। आत्मनेपदेष्विति वा। [illegible] अधावीत्। अस्मार्षीत्। संस्कृषीष्ट। समस्कृत इत्यत्र उपदेशाधिकारात् अ
न कृत्वा च सुट् इडागमो न भवति॥ छ। स्वरति सूति सूयति धूञूदितो वा। छ। स्वरति। सूति। सूयति। धूञ् ऊदित इत्येतेभ्य उदि
तश्च उत्तरस्य आर्धधातुकस्य वलादेर्वा इडागमो भवति॥ स्वर्त्ता। स्वरिता। सूति। प्रसोता। प्रसविता। सूयति। सोता। स
विता। धूञ्। धोता। धविता। ऊदितः। गाहू विलोडने। गाढा। गाहिता। गुपू रक्षणे। गोप्ता। गोपिता। गोपायिता। वृतिवर्त्तमा
ने पुनर्वीर्घस्तन्त्रं लिङ्सिचोर्निर्देश्यार्थं। सूतिसूयत्योर्विकरणनिर्देशः ४। लुगकरण इत्यस्य निर्देश्यार्थः ४। गमिति सानुबंध

४नह

कानि ईद्वाः। स्तुवि ष्टु न न इत्यस्य नित्यत्वमर्थः। सविता। धविते त्येव नित्यस्यात्तमेव नयो भवति। स्वरते रेतस्माद्विकल्पात् क्रमद्वन्नोः स्येड्
त्यं त (छूगधितेत्वा) इ वति विप्रतिषेधेन। स्वरिष्यति। कितित्वप्रत्यये भ्यकः कितीति नित्यं प्रतिषेधो भवति। एवं विप्रतिषेधेन। स्ट्वा।
त्वा। स्तुत्वा। ध्स्वा। छु॥ रधादिभ्यश्च। छु॥ रध इत्येवमादिभ्यश्च उत्तरस्य वलादेरार्धधातुकस्य स्यवाइडागमो भवति। रद्धा।
रधिता। नंष्टा। नशिता। त्रप्ता। तर्पिता। तृप्ता। तर्पिता। द्रप्ता। द्रप्ता। दर्पिता। द्रोग्धा। द्रोढा। द्रोहिता। मोग्धा। मोढा। मोहिता। स्नोग्धा।
स्नोढा। स्नोहिता। स्नेग्धा। स्नेढा। स्नेहिता। क्रादिनियमात् क्थिटि रधादिभ्यः परत्वाद्विकल्पं केचिदिच्छन्ति। अपरे पुनः राधुः॥ए
वं विधे रिट् प्रतिषेधविधानसामर्थ्यात् द्वयीस्त्वं प्रतिषेधनियमस्येति नित्यमिट्। भेवितव्यं रधि रधिवा रधिमत्येव भवति। छु॥
निरः कुषः॥ छु॥ निर् इत्येवं पूर्वात् कुषे उत्तरस्य वलादेरार्धधातुकस्य वाइडागमो भवति। निष्कोष्टा। निष्कोषिता। निरकुषितं।
कोषिता। कोषितुं। निस इति वक्तव्ये निर इति निर्देशो नरेफान्तमनुपसर्गान्तरमस्तीति ज्ञाप्यते। तस्य निश्चयनार्थत्वमपि उपसर्ग
स्यायताविनि लत्वं भवति। निसादित्वस्यासिद्धत्वान्न स्यात्॥ छु॥ इण्निष्ठायां॥ छु॥ निरः कुषो निष्ठायामिडागमो भव
ति। निष्कुषितः॥ निष्कुषितवान्। इड्ग्रहणं नित्यार्थं। आरम्भो हि यस्य विभाषत्वस्य बाधकोऽन्यथा हि विकल्पः

इषिंधने२

वस्यात्। अत्रैवचनित्यं इडागमो भवति। उ तत्र विकल्प एव वा छु॥ ८ तीषसहलुभरुषरिषः। छु॥ तकारादावार्धधातुके इष स
ह लुभ रुष रिष इत्येभ्यो वा इडागमो भवति। एष्टा। एषिता। इषु इच्छायामित्यस्यायं विकल्प इष्यते। यस्तु इष गताविति दैवादिकः॥
तस्य त्वेषिता। एषितुं। एषितव्यमिति नित्यं भवति। सोपि इष आभीक्ष्ण्ये इति क्र्यादिकस्तस्याप्येवमेव। तदर्थमेव तीषसहेति
सूत्रे केचिदुदितं पठंति। सोढा। सहिता। लोब्धा। लोभिता। रोष्टा। रोषिता। रेष्टा। रेषिता। तीति किं। एषिष्यते॥ छु॥ सनीवंतर्ध
२७ भ्रस्जदंभुश्रिस्वृयूर्णुभरज्ञपिसनां॥ छु॥ इवंतानां धातूनां ऋधु। भ्रस्ज। दंभु। श्रि। स्वृ। यु। ऊर्णु। भर। ज्ञपि। सन। इत्येतेषां च २७
सनि वा इडागमो भवति। दिवु दिदेविषति। दुद्यूषति। सिवु। सिसेविषति। सुस्यूषति। ऋधु। अर्दिधिषति। ईर्त्सति। भ्रस्ज॥
बिभ्रज्जिषति। बिभर्ज्जिषति। बिभ्रक्षति। बिभर्क्षति। दंभु। दिदंभिषति। धिप्सति। धीप्सति। श्रि। शिश्रयिषति। शिश्रीषति॥
स्वृ। सिस्वरिषति। सुस्वूर्षति। युञ्। यियविषति। युयूषति। ऊर्णुञ्। प्रोर्णुनूषति। प्रोर्णुनविषति। प्रोर्णुनुविषति। भर इ भृञ्।
इत्येतस्य भौवादिकस्य ग्रहणं। रा पानि दे शात्। बिभरिषति। बुभूर्षति। ज्ञपि। जिज्ञपयिषति। ज्ञीप्सति। सन। सिसनिषति। सि
षासति। केचिदत्र भरज्ञपिसनितनिपतिदरिद्राणामिति पठंति। तितनिषति। तितांसति। तितंसति। पिपतिषति। पित्सति। दिदरिद्र

द्विषति। दिद्द रिड्डा सति। सनीति किं। त्रष्टा। सू॥ क्लिशः क्त्वानिष्ठयोः॥ सू॥ क्लिशेर्धातोः क्त्वानिष्ठयो र्वा इडागमो भवति। क्लि-
शित्वा। क्लिष्ट्वा। क्लिशितः। क्लिशितवान्। क्लिष्टः। क्लिष्टवान्। क्लिश विबाधन इत्यस्य क्त्वायां निष्ठायां च ऊदितो वेति विकल्पः
सिद्धः। निष्ठायां यस्य विभाषेति प्रतिषेधः। क्त्वा प्राप्नोति। क्लिशू उपताप इत्यस्य तु क्त्वायां निष्ठायां च नित्यं इडागमः प्राप्नोति। एतदर्थं
तु क्त्वाग्रहणं क्रियते। सू॥ पूङ्श्च। सू॥ पूङ्श्च धातोः क्त्वानिष्ठयोर्वा इडागमो भवति। पवित्वा। पूत्वा। पवितः। पूतः। पवितवान्। पूतवान्
॥ सू॥ वसतिक्षुधोरिट्॥ सू॥ वसतेः क्षुधेश्च क्त्वानिष्ठयोर्नित्यमिडागमो भवति। उषित्वा। उषितः। उषितवान्। क्षुधित्वा। क्षुधितः। क्षुधित-
वान्। वसतीति विकरणनिर्देशार्थ एव। वस्तेस्तु रुदन्तत्वादेव भवितव्यमिट्। पुनरिड्ग्रहणं सर्वनित्यार्थं। सू॥ अञ्चेः पूजा-
यां। सू॥ अञ्चेर्धातोः पूजायामर्थे क्त्वानिष्ठयोरिडागमो भवति॥ अञ्चित्वा जानु जुहोति। अञ्चिता अस्य गुरवः। उदितो वेत्य-
नु क्त्वाञ्च्यत्ये विकल्पः प्राप्तः। निष्ठायां यस्य विभाषेति प्रतिषेधः। पूजायामिति किं। उदक्तमुदकं कूपात्। सू॥ लुभो विमोहने। सू॥
लुभेर्धातोर्विमोहनेर्थे क्त्वानिष्ठयोरिडागमो भवति। लुभित्वा। लोभित्वा। विलुभिताः केशाः। विलुभितः सीमन्तः। वि

क्षुभितानि पदानि । विमोहनमाकुलीकरणं । तत्र क्त्वायां तीषसहेतिनिष्ठायां यस्य विभाषेति प्रतिषेधप्राप्ते वचनं । विमोहनश
तिकिं । क्षुब्धो रथः लभ्यः । क्षुभ । क्षुभित्वा । लोभित्वा । गाध्येय यथाप्राप्तमेव ॥ उद्ग्रभ्यां क्त्वि । छु ॥ उद्ग्रभ्यां इत्येतयोः क्त्वाप्रत्यये इ
डागमो भवति । उद्गरीत्वा । उद्ग्रभित्वा । उद्ग्र इत्यस्य श्र्यूकः किति इति प्रतिषेधः प्राप्तः । ग्रभ्ये रूदित्वादि केन्ल्येषः । क्त्वाग्रहणं नि
२८ ष्ठानिवृत्त्यर्थं ॥ उदितो वा । उ । उदितो धातोः क्त्वाप्रत्यये वा इडागमो भवति । शमु । शान्त्वा । शमित्वा । तमु । तान्त्वा ॥ २८
तमित्वा । श्रमु । श्रान्त्वा । श्रमित्वा । भ्रमु । भ्रान्त्वा । भ्रमित्वा । दमु । दान्त्वा । दमित्वा ॥ सेसिचिकृतचृतछृदतृदनृतः । ७ ।
आर्धधातुके सकारादौ सिचि । कृत । चृत । छृद । तृद । नृत । इत्येतेभ्यो वा इडागमो भवति । कृत । कर्त्स्यति । अकर्त्स्यत् । वि
कर्त्सति । कर्तिष्यति । अकर्तिष्यत् । विकर्तिष्यति । चृत । चर्त्स्यति । अचर्त्स्यत् । विचर्त्सति । चर्तिष्यति । अ
चर्तिष्यत् । विचर्तिषति । छृद । छर्त्स्यति । अछर्त्स्यत् । विछर्त्सति । छर्दिष्यति । अछर्दिष्यत् । विछर्दिषति । तृद । तर्त्स्यति ।
अतर्त्स्यत् । वितर्त्सति । तर्दिष्यति । अतर्दिष्यत् । वितर्दिषति । नृत । नर्त्स्यति । अनर्त्स्यत् । विनर्त्सति । नर्तिष्यति । अनर्तिष्यत् ॥

निवर्त्तिष्यति। सइतिकिं। नर्त्तिता। असिचीतिकिं। अनर्त्तीत्। ॥ गमेरिट्परस्मैपदेषु। ॥ सेइत्यनुवर्त्तते। गमेर्धातोः सकारादा-
र्धधातुके से परस्मैपदेषु इडागमो भवति। गमिष्यति। अगमिष्यत्। जिगमिषति। गमेरितिकिं। वेष्यति। इट् ग्रहणं
नित्यार्थं। परस्मैपदेष्विति किं। संगंसीष्ट। संगंस्यते। समगंस्यत। अधिजिगांसते। संजिगांसते। गमेरिङादेशस्य अजुनि
गमांसनीतिदीर्घत्वं। सइत्येव। गंता। आत्मनेपदेनसमानपदस्थस्य गमेरयमिडागमो नेष्यते। अन्यत्रसर्वत्रेष्यते। कृत्य-
हिप पि न भवति। परस्मैपदलुकि च। संजिगमिषिता व्याकरणस्य। अधिजिगमि[illegible]षिता व्याकरणस्य। जिगमिषत्वं इति। पदशेषकारस्य
पुनरिदं दर्शनं। गम्युपलक्षणं परस्मैपदग्रहणं। परस्मैपदेषु यो गमिरुपलक्षितस्तस्मात्सकारादेरार्धधातुकस्य
परस्मैपदेषु इडागमो न भवति॥ न वृद्भ्यश्चतुर्भ्यः॥ ॥ वृद्भ्यश्चतुर्भ्यः परस्य सकारादेरार्धधातुकस्य इ[illegible] न भवति। वृतु। वर्त्स्य-
ति। अवर्त्स्यत्। विवृत्सति। वृधु। वर्त्स्यति। शृधु। शर्त्स्यति। अशर्त्स्यत्। शिशृत्सति। स्यंदू। स्यंत्स्यति। अस्यंत्स्यत्। सिस्यंत्स-
ति। चतुर्भ्य इति न वक्तव्यं। वृत्करणं हि तत्र फलादि। परिसमाप्त्यर्थं क्रियते। लृट्सामर्थ्यं। वृदिति। तदेव यदिह तादि परि

समासैऽर्थमपि विज्ञायते। न किंचिदनिष्टं प्राप्नोति। न क्रियते स्यंदेरूदित्त्वकरणं अंतरंगमपि विकल्पं प्रतिषेधो यथा बाधेतेति।
२१ वृत्तुर्ग्रहणे सति तात्पर्येण स्यंदिः सन्निधापितो भवति। परस्मैपदेष्वित्येव। वर्तिष्यते। अवर्तिष्यत। अत्राप्यात्मनेपदेन समा
नपदस्थे भ्योवृतादिभ्य इडागम इष्यते। अन्यत्र प्रतिषेधः। कृतेपि परस्मैपदे लुकि च प्रतिषेधो भवति। विवृत्सिता।
२७ विवृत्सितुं। विवृत्सितव्यं॥ ७॥ तासि च कृपः॥ ७॥ कृपकृतेरस्य तासेः सकारादेश्चार्धधातुकस्य इडागमो भवति। कल्प्तास्य: कल्प्त्वा २७
ति। चिकृप्सति। परस्मैपदेष्वित्येव। कल्पितास्ये। कल्पिषीष्ट। कल्पिष्यते। अकल्पिष्यत। चिकल्पिषते। =न= ह्यपरप्यात्मनेपदस
मानपदस्थादिडागम इष्यते। अन्यत्र प्रतिषेधः। कृतेपि परस्मैपदे लुकि च प्रतिषेधो भवति। चिकॢप्सिता। चिकॢप्सितासि। चिकॢ कृ ४
प्सात्यमिति॥ ७॥ ॥ अथ स्तोः स्ताश्च कृत्य निटो नित्यं॥ ७॥ तासौ ये नित्याऽनिटो धातवोऽजंतास्ते थ्यै स्ता सा विक
थलि नेट् भवति। याता। ययाथ। चेता। चिचेथ। नेता। निनेथ। होता। जुहोथ। अच इति किं। भेत्ता। बिभेदिथ। तास्व
दिति किं। लूत्वा। लुलविथ। लै थल्ल्वीति किं। याता। ययिव। ययिम। अनिड्ग्रहणं नित्यमित्यनेन विशेषणार्थं। नित्यग्रह

णांकिं। विधोता। विधविता। विदुधविथ। तासौ विभाषिते टः थलि नित्यमिडागमो भवति। तास्वदिति वर्तिनिर्देशात्तासौ।
सतस्थलि प्रतिषेधार्थः। योहि तासावसन्न। असत्वाच्छ्रूमिन्नित्यानिटस्तस्य थलि प्रतिषेधो न भवति। जघसिथ। उवयिथ।
उवर स्तत्रेता स्वदि वर्तते। अदादेशोऽहि घासि वैभादेशाश्च वयि तासौ नास्ति॥ ७॥ उपदेशेऽत्वतः॥ ७॥ उपदेशे
यो धातुरकारवान् तासौ नित्यमनिट् तस्मादुत्तरस्य थलि इडागमो न भवति। शक्ता। शशक्थ। पक्ता। पपक्थ। य
ष्टा। इयष्ठ। उपदेश इति किं। कर्ष्टा। चकर्षिथ। अत्वत इति किं। भेत्ता। बिभेदिथ। तपरकरणं किं। राद्धा। रराधिथ। तास्व
दित्येव। जिघत्सति। जघसिथ। नित्यमनिट् इत्येव। अंक्ता। अंजिता। आनंजिथ॥ ७॥ ऋतो भारद्वाजस्य॥ ७॥ ऋका
रांतात्तासौ भारद्वाजस्याचार्यस्य मतेन तासाविव [illegible] नित्यानिटः थलि इडागमो न भवति। स्मर्त्ता। सस्मर्थ। ध्वर्त्ता।
दध्वर्थ। कर्त्ता। चकर्थ। सिद्धे सत्यारंभो नियमार्थः। ऋत एव भारद्वाजस्य नान्यस्मात्। ययिथ। विव्ययिथ। पेचिथ।
शेकिथ। तदयमर्थात्सर्वयोर्योगयोर्विकल्पः। तपरकरणमृकारांतनिवृत्त्यर्थं। तथाहि सतिविव्यर्थमेतत्स्यात्॥ ७

बभूथाततंथजगृभ्मववर्थेतिनिगमे।छ॥ बभूथ। आततंथ। जगृभ्म। ववर्थ। इत्येतानि निपात्यन्ते निगमे विषये। निगमो वेदः॥ बभूथ
त्वंहि होता प्रथमो बभूथ। बभूविथेति भाषायां। आततंथ। येनांतरिक्षमुर्वाततंथ। आतेनिथेति भाषायां। जगृभ्म। जगृ
भ्माते दक्षिणमिंद्र हस्तं। जगृहिमेति भाषायां। ववर्थ। ववर्थ त्वं ज्योतिषा। ववरिथेति भाषायां।छ॥ विभाषा सृजिदृशोः॥छ॥ सृ
जिदृशोः इत्येतयोः थलि विभाषा इडागमो भवति। सस्रष्ठ। ससर्जिथ। दद्रष्ठ। ददर्शिथ।छ॥ इडत्त्यर्तिव्ययतीनां॥छ॥ अत्ति। अर्ति
३० व्ययति। इत्येतेषां थलि इडागमो भवति। अत्ति। आदिथ। अर्ति। आरिथ। व्ययति। संविव्ययिथ। व्येञो न व्योल्लिटीत्यात्वप्रतिषेधः। ३०
अत्तिव्ययत्योर्भारद्वाजस्येति नियमाद्विकल्पः। अर्तेरपि नित्यप्रतिषेधः प्राप्तः। अर्तेरेव ग्रहणं विस्पष्टार्थं। विकल्पविधा
नेहि अत्तिव्ययति ग्रहणमनर्थकं। प्रतिषेधविधाने वार्त्तिग्रहणमिति नित्योयं इड्विधिरिति इड्ग्रहणमंतरेणापि शक्यं ज्ञातुं॥छ
वस्वेकाजाद्घसां॥छ॥ कृतद्विर्वचनानामेकाचां धातूनामाकारांतानां च घसेश्च वसाविडागमो भवति। आदिवान्। आशिवान्॥
पेचिवान्। धात्वभ्यासयोरेकादेशे कृते एत्वाभ्यासलोपयोश्च कृतयोः कृतद्विर्वचनात् एते एकाचो भवंति। आतः। पपिवान्। तस्थि
वान्। घसः। जक्षिवान्। सिद्धे सत्यारंभो नियमार्थः। एकाचाद्घसामेव वसाविडागमो भवति। नान्येषामिति। बिभिद्वान्।

विद्विद्वान्। बभूवान्। क्रादिनियमात् प्रतिषेधाभावात् वसोयं इट् प्रसक्तः स नियम्यते। आ[illegible] ग्रहणमनेकाजर्थं। द्विर्वचने
कृते इटि सति आतो लोपेन भवितव्यं। दरिद्रातेस्तु कास्यनेकाज् ग्रहणं तुँल्तुं पाद्यर्थं इति ओमा भवितव्यं। दरिद्रांचकृवा
न्। अथाप्याम् न क्रियते। तथापि दरिद्राने रार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति प्रागेव प्रत्ययोत्पत्तेराकारे लुप्ते
इडागमस्य न निमित्तमिति। दद्दरिद्वानिति भवितव्यं। घसेरपि यद्यपि ग्रहणं न क्रियते। तदा द्विर्वचनात् परत्वात् घसिभसोर्हलि
ल्लि चेति उपधालोपेन भवितव्यं। तत्र कृते द्विर्वचनं एकाच्त्वं स्यात्। अन कृत्वोदिह घसिग्रहणात् उपधालोपमपि परत्वादिडागमो
बाधते। गमहनजनखनघसां लोपः। स च द्विर्वचने कर्तव्ये स्थानिवद्भवति। तेन जक्षिवानिति सिध्यति। ७। विभाषा गमहनवि
दविशां। ७। गम। हन। विद। विश। इत्येतेषां धातूनां वसौ विभाषा इडागमो भवति। जग्मिवान्। जगन्वान्। मोनो धातोः। म्वोश्च मकारस्य नकारः। हन। जघ्निवान्। जघन्वान्। विद। विविदिवान्। विविद्वान्। विश। विविशिवान्। विविश्वान्। विशिनासाहचर्यात् इह विदे
स्तौदादिकस्य लाभार्थस्य ग्रहणं। ज्ञानार्थस्य तु विविद्वानित्येव भवति। दृशेश्चेति वक्तव्यं। ददृशिवान्। ददृश्वान्। ७। सनिंसस
निवांसं। ७।। सनिं पूर्वस्य सनोतेः सनतेर्वा सनिंससनिवांसमिति निपात्यते। अग्निं लाग्नेः सनिंससनिवांसं। इडागम एत्वाभ्या

ति७

सत्नोपाश्च्यँ भावश्च्यनिपातनात्सनिट्त्वं हन्यत्र सेनिवां समित्येव भवति। छ॥ ऋद्धनोः स्ये। छ। ऋकारांतानां हंतेश्च स्येपरतइडाग
मो भवति। करिष्यति। हंतेः हनिष्यति। स्वरतेर्विकल्पितेट्त्वात् ऋद्धनोः स्ये भवतिविप्रतिषेधेन। स्वरिष्यति। तपरकरणंवि
31 स्पष्टार्थी। अंजेः सिचि। छ॥ अंजेः सिचि इडागमो भवति। आंजीत्। आंजिष्टां। आंजिषुः। सिचीतिकिं। अंक्ता। अंजितं॥
३१ ऊदित्वाद्विभाषितेट् न भवति। छ॥ स्तुसुधूञ्भ्यः परस्मैपदेषु। छ॥ स्तु' सु' धूञ्' इत्येतेषां सिचि परस्मैपदपरे इडागमो ३१
भवति। स्तु' अस्तावीत्। सु' असावीत्। धूञ्' अधावीत्। परस्मैपदेष्विति किं। अस्तोष्ट। असोष्ट। अधोष्ट। अधविष्ट।
छ। यमरमनमातां सक्च। छ॥ यम' रम' नम' इत्येतेषामंगानामाकारांतानां च सगागमो भवति। परस्मैपदपरे सिचि इड्
डागमो भवति। यम्' अयंसीत्। अयंसिष्टां। अयंसिषुः। रम्' व्यरंसीत्। व्यरंसिष्टां। व्यरंसिषुः। नम' अनंसीत्। अनंसिष्टां। अ
नंसिषुः। आकारांतानां। अयासीत्। अयासिष्टां। अयासिषुः। यमादीनां हलंतलक्षणा वृद्धिः प्राप्ता स्यानेटीति प्रतिषिध्य
ते। परस्मैपदेष्वित्येव। अयंस्त। अरंस्त। अनंस्त॥ स्मिपूङ्रंज्वशां सनि। छ॥ स्मि' पूङ्' ऋ' अंजू' अशू' इत्येतेषां धातूनां स।

निइडागमो भवति। सिस्मयिषते। पिपविषते। अंजिजिषति। अशिशिषत इति। ०। किरश्च पंचभ्यः। ०। किरादिभ्यश्च पंचभ्यः सनि पर
त इडागमो भवति। कॄ। चिकरिषति। गॄ। जिगरिषति। दृङ्। दिदरिषते। धृङ्। दिधरिषते। प्रछ। पिपृच्छिषति। पंचभ्य इति किं। सिस्तीर्षति।
किरतिगिरत्योरिति सनि वेति विकल्पः प्राप्तः। दृतो वेति वास्य इटो दीर्घत्वं नेच्छंति। ०। रुधादिभ्यः सार्वधातुके। ०। रुदादिभ्यः पंच
भ्य उत्तरस्य वलादेः सार्वधातुकस्य इडागमो भवति। रुदिर्। रोदिति। स्वप्। स्वपिति। श्वस। श्वसिति। अन। प्राणिति। जक्ष। जक्षिति।
पंचभ्य इत्येव। जागर्ति। सार्वधातुक इति किं। स्वप्ता। वलादेरि[illegible]त्येव। रुदंति। ०। ईशः से। ०। ईश उत्तरस्य से इत्येतस्य सार्वधातु
कस्य इडागमो भवति। ईशिषे। ईशिष्व। एकदेशविकृतस्यानन्यत्वात्। ०। ईडजनोर्ध्वे च। ०। ईड। जन। इत्येताभ्यां उत्तरस्य ध्वे इत्येतस्य सार्वधा
तुकस्य से इत्येतस्य च इडागमो भवति। ईडिध्वे। ईडिध्वं। ईडिषे। ईडिष्व। जनिध्वे। जनिध्वं। जनिषे। जनिष्व। जनी प्रादुर्भावे इत्यस्य छांदस
त्वाच्छ्यनो लुक्। उपधालोपाभावश्च। जन जनन इत्येतस्यापि श्लुविकरणस्य ग्रहणमत्रेष्यते। तस्य व्यतिजज्ञिषे। व्यतिजज्ञिध्वे इति भवति। ध्वे
शब्दे ईशेरपि इडागम इष्यते। ईशिध्वे। ईशिध्वं इति। तदर्थं केचिदीडजनोः स्ध्वे चेति सूत्रं पठंति। सकारादेर्ध्वेशब्दस्य सूत्र उपादानाद्ध्वश
ब्द ईशेरनुकर्षणार्थो विधीयते। ईडीशजनीनां सेध्वयोरिति वा नैकमेव सूत्रं पठंति। विचित्रा हि सूत्रस्य कृतिः पाणिनेरिति। ध्वे इति कृते टेरे

× कर्तरि कर्मव्यतिहार इति आत्मनेपदं ३

लस्य यँ ग्रहणात् लङि धमिति न भवितव्यमिटा। लाटि पुनरेकदेशविकृतमनन्यवद्भवतीति भवितव्यं।छ। लिङः सलोपोनंत्यस्य।छ। सार्वधा
तुके यो लिङः तस्यानंत्यस्य सकारस्य लोपो भवति। कः पुनरंत्यो लिङः सकारः। यासुं यासुट् सीयुट् सुटां। कुर्यात्। कुर्यातां। कुर्युः। कुर्वीत। कुर्वीय
३२ तां। कुर्वीरन्। अनंत्यस्येति किं। कुर्युः। कुर्याः। सार्वधातुक इत्येव। क्रियास्तां। क्रियासुः। कृषीष्ट। कृषीयास्तां। कृषीरन्।छ। अतो येयः।छ। अकारां ३२
तादंगादुत्तरस्य सार्वधातुकस्य या इत्येतस्य इय् इत्ययमादेशो भवति। पचेत्। पचेतां। पचेयुरित्यत्र उस्य पदांताददिति पररूपं बाधितं। अत इ
ति किं। चिनुयात्। तपरकरणं किं। यायात्। सार्वधातुक इत्येव। चिकीर्ष्यात्। चिकीर्ष्यास्तां। चिकीर्ष्यासुः। ननु चातो लोपेनात्र भवितव्यं। परत्वात्
यत्रापि तर्हि अतो दीर्घो यञीति दीर्घत्वेन भवितव्यं। तदनेनावश्यं विध्यंतरं बाधितव्यं। सदी● र्घत्वस्यैवातो लोपस्यापि बाधकः स्यात्।
स्यादेतदेवं। यदि दीर्घत्वं सार्वधातुके विधीयते। अथ तु तिङि विधीयते। तदायेन नाप्राप्तिन्यायेन दीर्घत्वस्यैव बाधकः स्यात्। न पुनरतो
पँलोपस्य। यय इत्यविभक्तिको निर्देशः। याइति य इति वा षष्ठीनिर्देशो यल्लोपस्यासिद्धत्वमनाश्रित्य आगुणः। सोऽयं निर्देश इति।
केचिदत्रातो यासिय इति सूत्रं पठंति। तेषां सकारांतस्थानिनावषष्ठीसमासः।छ। आतो ङितः।छ। आकारस्य ङिदवयवस्य अकारांताद् गादुत्त
रस्य इय् इत्ययमादेशो भवति। पचेते। यजेते। पचेथे। यजेथे। पचेतां। ●यजेतां। पचेथां। यजेथां। सार्वधातुकमपिदित्यत्र सूत्रे चाङितीवङिद्वदिति

नांगीक्रियते। अपितुङिदिवङि द्वदिति। एवंस्त्वत्रलवत्तथुकुटिपनीति प्रसिद्धयेतथांगीकरणं। आत इतिकिं। पवंति। पवंते। इङित इतिकिं। पचावहे। प
चामहे। अत इत्येव। चिन्वाते। स्तुन्वाते। तपरकरणं किं। तपरकरणंकिं। मिमाथे। छ। आनेमुक्। छ। आनेपरतोऽङ्गस्य अतोमुगागमो भव
ति। पवमानः। यजमानः। अकारमात्रग्रक्रोयंमुक्। अदुपदेशाग्रहणेन गृह्यत इति। अदुपदेशादितिल्सार्वधातुकमनुदात्तं भवति। यद्य
वं आतोङित इत्ययमपिविधिः प्राप्नोति। तपरनिर्देशान्न भविष्यति। मुकिसत्यष्टमात्रो भवतीतिल्सार्वधातुकानुदात्तमपितर्हि न
प्राप्नोति। नैषदोषः। उपदेश ग्रहणंत्रक्रियते। तेनउपदेशाद् ध्वंसत्यपिकाल्भेदे भवितव्यं। तथाच पचावः। पचामः। इत्यत्र भवति। छ
ईदासः। छ। आसनेऽत्तरस्य आनस्यईकार आदेशो भवति। आसीनोयजते। पंचम्याउत्तरस्याःषष्ठीप्रकल्पते। छ। अष्टन आविभक्तौ। छ। अ
ष्टन् इत्येतस्यविभक्तौपरत आकार आदेशो भवति। अष्टाभिः। अष्टाभ्यः। अष्टानां। औं अष्टासु। विभक्ताविति किं। अष्टत्वं। अष्टता।
आ इति व्यक्तिनिर्देशायं। आह्रितिनिर्देशेतु नकारस्य स्थाने अनुनासिकः स्यात्। विकल्पेनायमाकारो भवतीत्येतत्तु ज्ञापितं। अष्टनो दीर्घादि
तिदीर्घग्रहणात्। अष्टाभ्य ओशिति वक्ष्यतात्तनिर्देशात्। तेन अष्टभिः। अष्टभ्य इत्यपि भवति। तदंतविधिश्चात्रेष्यते। प्रियाअष्टौयेषां ते प्रिया
ष्टानः इति [redacted] पथास्यादिति। [redacted] छ। रा

अस्तार

योहलि॥ ॥ रै इत्येतस्य हलादौ विभक्तौ परत आकार आदेशो भवति। राभ्यां। राभिः। हलीति किं। रायौ। रायः। विभक्तावित्ये। रैत्वं। रैता।
मृजेर्द्विरित्यतः आ विभक्त्यधिकारः॥ युष्मदस्मदोरनादेशे॥ युष्मद् अस्मद् इत्येतयोरनादिष्टायां विभक्तौ परत आकार आदेशो
३२ भवति। युष्माभिः। अस्माभिः। युष्मासु। अस्मासु। अनादेश इति किं। युष्मत्। अस्मत्। हलीत्यधिकाराद् अत्र न स्यात्। उत्तरत्र अ ३२
नादेशग्रहणं प्रयोजनं यो वीति। तद्दहैव क्रियते॥ द्वितीयायां च॥ द्वितीयायां विभक्तौ परत युष्मदस्मदोराकार आदेशो भवति॥
त्वां। मां। युवां। आवां। युष्मान्। अस्मान्। आदेशार्थं वचनं। शसो न इति नकारः॥ प्रथमायाश्च द्विवचने भाषायां॥ प्रथमायाश्च द्विवचने
परतो भाषायां विषये युष्मदस्मदोराकार आकार आदेशो भवति। युवां। आवां। प्रथमाया इति किं। युवयोः। आवयोः। द्विवचन इति किं। त्वं।
अहं। यूयं। वयं। भाषायां इति किं। यूयं वस्त्राणि पीवसा वसाथे॥ यो ऽचि॥ अजादौ विभक्तौ परतो ऽनादेशे युष्मदस्मदोर्यकार आदेशो
भवति। त्वया। मया। त्वयि। मयि। युवयोः। आवयोः। अचीति किं। युवाभ्यां। आवाभ्यां। युष्मदस्मदोरनादेश इत्यत्र यदि हलीत्यनुवर्त्तेत तदा म
कयमक तुभ्यमचीत्येतत् तदे। अनादेश इत्येव। त्व ऋच्छति। म ऋच्छति॥ शेषे लोपः॥ शेषे विभक्तौ युष्मदस्मदोरन्त्यो लोपो भवति। कश्च शेषः।
यत्राकारो यकारश्च न विहितः। पंचम्याश्च तुर्थ्याश्च षष्ठी प्रथमयोरपि। यान्या द्विवचनान्यत्र शेषे लोपो विधीयते। त्वं। अहं। यूयं। वयं। तु

भ्यां। मह्यं। युष्मभ्यं। अस्मभ्यं। त्वत्। मत्। युष्मत्। अस्मत्। तव। मम। युष्माकं। अस्माकं। शेषग्रहणं विस्पष्टार्थं। शेषे लोपः के ते स्त्रियां टाप् कस्मान्न
भवति। त्वं ब्राह्मणी। अहं ब्राह्मणी। सन्निपातलक्षणो विधिर[illegible] निमित्तं तद्विघातस्येति। अलिंगे वा युष्मदस्मदी इति केचित्। शेषे लो
पंटि लोपमिच्छंति। कथं। वक्ष्यमाणादेशापेक्षः शेषः। तेषां देशाम पर्यंतस्य। तेन मपर्यंताद्योन्यः स शेष इति। तत्रायं [illegible] टि लोपः।७।
मपर्यंतस्य।७। मपर्यंतस्येत्ययमधिकारः। यदित ऊर्ध्वमनुक्रमिष्यामः मपर्यंतस्येत्येवं तद्वेदितव्यं। वक्ष्यति। युवावौ द्विवचने। युवां। आवां।
मपर्यंतस्येति किं। युवकां। आवकामिति। साकच्कस्य मा भूदिति। त्वमावेकवचने। त्वया। मया। मपर्यंतस्येति किं। सर्वस्य मा भूत्। न
थाव सति त्वमयोर् कारस्य यो वीति यकारे सं[?]कृते अनिष्टं रूपं स्यात्। मांतस्येत्येव सिद्धे स्थिन्यत्परिग्रहणं हि तं अवधिद्योत
नार्थं। न मांते मा भूद्यदा तदा।८। त्यं तयोः [illegible] क्विपि मांतत्वं विघ्नते युष्मदस्मदस्मदोः स्थानिवत्वं वर्णे क्वौ लुप्तत्वान्नाविघ्न
ते।७। युवावौ द्विवचने।७। द्विवचन इत्यर्थग्रहणं। द्विवचने ये युष्मदस्मदी द्व्यर्थाभिधानविषये तयोर्मपर्यंतस्य स्थाने युव आव इत्ये
तावादेशौ भवतः। युवां। आवां। युवाभ्यां। आवाभ्यां। युवयोः। आवयोः। यदापि समासे द्व्यर्थे युष्मदस्मदी भवतः समासार्थस्य त्वन्यसंख्या
त्वादेकवचनं बहुवचनं वा भवति। तदापि युवावौ भवतः। यदित्वाहो साविताद्यादेशांतरेण न बाध्यते। अतिक्रांतं युवां। अतियुवां। अतिक्रां

कां मा त मा वां । अत्यावां । अति क्रांतान्त्युवां । अति युवान् । अति क्रांतान् आवां । अत्यावान् । अति क्रांतेन युवां । अति युवया । अत्यावया । अति
क्रांताभ्यां युवां । अति युवाभ्यां । अति आवाभ्यां । अति क्रांतैर्युवां । अतियुवाभिः । अत्यावाभिः । अति क्रांतेभ्यो युवां हेतिः । अति
34 युवभ्यं । अत्यावभ्यं । अति क्रांतात्युवां । अति युवत् । अत्यावत् । अति क्रांतेभ्यो युवां । अति युवत् । अत्यावत् । अति क्रांता 34
नां युवां । अति युवाकं । अत्यावाकं । अ अति क्रांते युवां । अति युवि । अत्यावयि । अति क्रांतेषु युवां । अति युवासु । अत्यावासु ।
त्वा हादी नां तु विष यपरत्वात्त्वं भवंति । अति क्रांतो युवां । अति त्वं । अ अत्यहं । अति क्रांता युवां । अति त्वयं । अति वयं ।
अति क्रांताय युवां । अति तुभ्यं । अति मह्यं । अति क्रांतस्य युवां । अति तव । अति मम । यदा तु युष्मदस्मदी एकत्व बहुत्वे
प्यावर्तेते । समासे स्क[illegible] वृत्तिः । तदा युवावौ न भवतः । अति क्रांतो त्वां । अति त्वां । अति मां । अति क्रांतो युष्मान् । अ
ति युष्मां । अत्यस्मां । एवं नेयं ॥ ॥ यूयवयौ जसि ॥ ॥ युष्मदस्मदोर्मपर्यंतस्य यो युजसि परतो यूयवयइत्येतावा
देशौ भवतः । यूयं । वयं । परम यूयं । परम वयं । अति यूयं । अति वयं । तदंतविधिरत्र न भवति । अंगाधिकारे तस्य च तदु

53